P_1 IFP Ms RE 42976. Palm-leaf, Grantha script, 3cm X 38cm. Badly damaged by worms. This bundle has been entitled *Dhyāna-muktāvalī* and the *Dhyānaratnāvalī* (11r-26v) is placed as the second text in the bundle. The bundle contains other texts, *Pañcāvaraṇastava* (ff. 1r-11r) *Devyaṣṭottaraśatanāmastotra* (ff. 27r-28v), *Ajapājapa* (ff. 28v-31r), some visualisations (ff. 34r-43v) and *Kedāreśvaravratakalpa* (ff 45r–57v).

T_1 Ms No. 2881. Oriental Research Institute and Manuscripts Library, University of Kerala, Trivandrum. Palm-Leaf, Grantha script, 4.5cm × 41.5cm, 11 Folios, Complete.

I.3.5. Testimonia

A list of works in which we find verses similar to verses found in the *Dhyānaratnāvalī* and also in the texts that quote the *Dhyānaratnāvalī*.

Ātmārthapūjāpaddhati (*ĀPūPa*) by the sixteenth-century author Vedajñāna II (IFP Mss T. 323) (For a detailed study of the text see Ganesan 2009).

Kriyākramadyotikā (*Kriyā*) of Aghorśsivācārya. Published with the commentary (Prabhāvyākhyā) of Nirmalamani, ed. Ramasastrin and Ambalav-ānajñānasambandhaparāśaktisvāmin. Chidambaram 1927.

Dhyānaratnāvalī (IFP Ms. T. 680). This is a work that contains a collection of verses on the visualisation and in this, the visualisation of Kalā-s are similar to those of the *Dhyānaratnāvalī* of Trilocanaśiva.

Mṛgendrapaddhatiṭīkā of Vaktraśambhu (IFP T. 1021). This is a commentary on a *paddhati* attributed to Aghoraśiva that bases itself on the *Mṛgendra*.

Śivapūjāstavavyākhyā: This is an anonymous commentary transmitted in a number of South Indian manuscripts on the *Śivapūjāstava* of Jñānaśambhu, the author of the *Jñānaratnāvalī*. Although the commentator's name is not known, he identifies himself as the great-great-grandson of Trilocanaśivācārya, the author of the *Dhyānaratnāvalī*. (ed. K. M. Subramanyasastri, Devakottai: Sivagamasangha, 1935).

Siddhāntadīpikā of Madhyārjunaśiva (Unpublished / IFP Mss T. 112 and T. 284). "This is a catechistic prose work with plentiful quotations from the late South Indian *Siddhāntatantras* (e.g. from the *Ajita, Makuṭa, Santāna* and *Vātulaśuddhākhya*), which a final verse ascribes to an abbot of a maṭha in Triuviṭaimarutūr (the Sanskrit name of which is Madhyārjuna). The author also quotes (without always identifying the source he is quoting) the *Siddhāntasamuccaya* of Trilocanaśivācārya".[19]

Somaśambhupaddhati **of Somaśambhu** (*Soma*) (in 4 Vols., ed. Brunner, Helene, IFP, Pondicherry 1963–1998).

[19] Dominic Goodall, 2001:cxxii–iii.

स्रुक्कमण्डलुकं वामे दक्षे पद्माक्षमालिके।

[विद्यातत्त्वम्]

नीलस्पन्दनिभं नीलमष्टाश्राष्टभुजान्वितम्॥ ४॥

चक्रबाणाब्जचिन्मुद्राशङ्खकार्मुककुण्डिकाः।
अभयं च यथायोगं दधानं दक्षवामयोः॥ ५॥

एकवक्त्रं तु सौम्यास्यं विद्यातत्त्वं प्रकीर्त्तितम्।

[शिवतत्त्वम्]

शुद्धस्फटिकसङ्काशं वृत्तं सर्वाध्वगर्भितम्॥ ६॥

शिवतत्त्वं स्मृतं ह्येतत् पञ्चवक्त्रं चतुर्भुजम्।
दक्षे पद्माक्षमालां च वामे शूलकमण्डलुम्॥ ७॥

[निवृत्तिकला]

तप्तचामीकराकारा चतुर्वक्त्रेन्दुभूषिता।
वज्राभयाक्षमालाब्जा निवृत्तिः परिकीर्तिता॥ ८॥

[प्रतिष्ठाकला]

शुद्धस्फटिकसङ्काशा चैकवक्त्रा चतुर्भुजा।

---

8 –12. तप्तचामीकराकारा ... शान्त्यतीता वरप्रदा, *Kriyākramadyotikā* (*Kriyā*), p. 204.

---

4 a. °कमण्डलुकं वामे] M_1P_1; °कमण्डु वामे तु T_1 4 b. °मालिके] *conj.*; °मा-
लिकाम् M_1P_1; °मालिका T_1 4 c. नीलस्पन्दनिभं नीलम्] P_1; नीलपद्मनिभं नीलं
M_1; निस्पन्दनिभ नीलं वा T_1 4 d. भुजान्वितम्] P_1T_1; भुजाक्षतम् M_1 5 c. य-
थायोगं] M_1P_1; तथायोगा° T_1 7 c. दक्षे] T_1, *ĀPūPa*, M_1; ---P_1 7 c. °मालां
च] $M_1P_1T_1$; °मालाश्च *ĀPūPa* 8 a. °कराकारा] P_1T_1; °कराभासा M_1, *Kriyā*
8 b. °वक्त्रेन्दु°] M_1P_1, *Kriyā*; वक्त्रे तु T_1 8 d. °कीर्तिता] M_1P_1, *Kriyā*; °की-
र्तितः T_1

पाशाभयाक्षमालाब्जा प्रतिष्ठा रक्तभूषिता॥ ९॥

[विद्याकला]

रक्तवर्णा कपर्देन्दुस्त्रिवक्त्रा च चतुर्भुजा।
शक्त्यभयाक्षमालाब्जा विद्या ज्वलनसन्निभा॥ १०॥

[शान्तिकला]

चतुर्वक्त्रा चतुर्बाहुः कृष्णवर्णा महाबला।
ध्वजाभयाक्षमालाब्जा शान्तिः सर्पोपवीतिनी॥ ११॥

[शान्त्यतीतकला]

शुद्धस्फटिकसङ्काशा पञ्चवक्त्रा चतुर्भुजा।
पाशाभयाक्षमालाब्जा शान्त्यतीता वरप्रदा॥ १२॥

[पृथिव्यादितत्त्वरूपम्]

क्ष्मातत्त्वं सुपीताभं चापाकारं जलं सितम्।
रक्तं त्रियस्रं वह्न्याख्यं कृष्णो वायुष्षडस्रकः॥ १३॥
सितं सुवृत्तं व्योमाख्यं गन्धः पीतो रसस्सितः।

---

9 c. °मालाब्जा] M_1P_1; °मालाब्ज T_1 **9 d.** रक्त°] P_1; रत्न° M_1T_1 **10 b.** °स्त्रिवक्त्रा च चतुर्भुजा] *Kriyā*; °त्रिवक्त्रा चतुर्भुजा M_1 (unmetrical); °त्रिवक्त्रा च चतुर्भुजा P_1T_1 **10 c.** शक्त्यभयाक्ष°] P_1T_1; शक्त्याभयाक्ष° *Kriyā*, M_1 **11 a.** °बाहुः] M_1P_1, *Kriyā*; °बाहू T_1 **11 b.** महाबला] $M_1P_1T_1^c$, *Kriyā*; चतुर्भुजा T_1^{ac} **11 d.** शान्तिः सर्पोपवीतिनी] *Kriyā*; शन्तिस्सर्पोपवीतिनी M_1; --- स्पृपोप--- तिनि P_1; शान्ति सर्पोपवीतिनी T_1 **12 a.** °सङ्काशा°] M_1P_1, *Kriyā*; °सङ्काश° T_1 **12 b.** पञ्चवक्त्रा] $M_1P_1T_1$; चैकवक्त्रा *Kriyā* **12 d.** शान्त्यतीता वरप्रदा] M_1P_1; शान्त्यातीता वरप्रदा T_1; प्रतिष्ठा रत्नभूषिता *Kriyā* **13 a.** क्ष्मातत्त्वं सुपीताभं] *conj.*; क्ष्मातत्वमस्रुं पीताभं M_1; युगास्रुं मेदिनीं हैमं P_1; क्ष्मातत्त्वमपि तापञ्च T_1 **13 b.** चापाकारं जलं सितम्] M_1; चापाकारं जलं —P_1; ⊔T_1 **13 c.** रक्तं त्रियस्रं वह्न्याख्यं] *conj.*; रक्तं त्रयस्रं वह्न्याख्यं M_1; --- न्याख्यं P_1; रक्तं त्रयस्रुवह्न्याख्यं P_2; रक्तन्त्रयस्रुं वह्न्या° T_1 **13 d.** कृष्णोवायुष्षडस्रकः] P_1; कृष्णो वायुः षडस्रकम् M_1P_2; कृष्णोवायुषडस्रुकम् T_1 **14 a.** सुवृत्तं] M_1T_1; संवृत्तम् P_1 **14 b.** गन्धः पीतोरसस्सितः] P_1; गन्धः पीतोरसं स्मितं M_1; गन्धपीतोरवस्थितः T_1

रूपो रक्तस्ततस्पर्शः कृष्णश्शब्दः सितप्रभः॥ १४ ॥

रक्तवर्णमुपस्थं च पाय्वाख्यं पीतसन्निभम्।
पादः श्यामप्रभः पाणिः पीताभोऽर्कप्रभा तु वाक्॥ १५ ॥

नानावर्णनिभा नासा जिह्वा रक्ता तथैव च।
दृत्क्वक्श्रोत्रत्रयं कृष्णं मनो व्यामिश्रवर्णकम्॥ १६ ॥

अहंकारस्तु रक्ताभो बुद्धिः काश्मीरसन्निभा।
गुणाख्यमिन्द्रनीलाभं अव्यक्तं रक्तसन्निभम्॥ १७ ॥

रागो रक्तो नियत्याख्यं नीलं विद्येन्द्रगोपभाक्।
कलाख्यमिन्द्रवर्णाभं कालाख्यं नीलसन्निभम्॥ १८ ॥

हरितालप्रभा माया विद्या रक्तेन्द्रगोपभाक्।
स्फटिकाभं तु सादाख्यं शक्तितत्त्वं सितप्रभम्॥ १९ ॥

शुद्धस्फटिकसंकाशं शिवतत्त्वं प्रकीर्तितम्।

17.T_1 adds the following half line after 17b.: तत्त्वश्चात्र त्रयं कृष्णं मनो व्यामिश्रवर्णकम्।

---

14 c. रूपोरक्तस्ततस्पर्शः॰] T_1; रूपं रक्तन्ततस्पर्शः M_1; रूप— र्शः P_1 14 d. सितप्रभः] M_1P_1; सितप्रभा T_1 15 b. पाय्वाख्यं] M_1P_1; पृत्याख्यं T_1 15 c. पादः श्यामप्रभः पाणिः] T_1; पादं प्रभः पाणिः M_1 (unmetrical); पाणिः P_1 (unmetrical) 15 d. पीताभोर्क॰] M_1T_1; पीतं — मो भोक्त P_1 15 d. ॰प्रभा तु वाक्] M_1P_1; ॰प्रभा तु वा T_1 16 b. जिह्वा] P_1T_1; जिह्व M_1 16 cd. दृत्क्वक्श्रोत्रत्रयं कृष्णं मनो व्यामित्रवर्णकम्] T_1; त्वक्श्रोत्रत्रयं कृष्णं मनो व्यामिश्रवर्णकं M_1; दृत्कक् — मनोव्यामित्रवर्णकम् P_1 17 a. ॰कारस्तु रक्ताभो] P_1T_1; ॰कारत्ताभो M_1 (unmetrical) 17 b. ॰सन्निभा] M_1P_1; ॰सन्निभं T_1 17 c. गुणाख्यमिन्द्रनीलाभं] M_1T_1; गुणाख्य—P_1 17 d. अव्यक्तम् रक्तसन्निभम्] P_1; नोप्यक्तम् रक्तसन्निभम् M_1; अव्यक्तमहसन्निभं T_1 18 a. रक्तो नियत्याख्य॰] P_1; रक्ता नियत्याख्य॰ M_1; रक्तो निधाख्याख्य॰ T_1 18 b. विद्येन्द्रगोपभाक्] *conj.*; विद्येन्द्रकोपभा M_1 (unmetrical); विद्येन्द्रकोपभाक् P_1T_1 18 cd. कलाख्यमिन्द्रवर्णाभं कालाख्यं] P_1; कालाख्यं मिश्रवर्णस्यात्कलाख्यन् M_1; कालाख्यामिन्द्रवर्णस्योत्कलाख्या T_1 19 b. रक्तेन्द्रगोपभाक्] *conj.*; रक्तोत्वरं सितं M_1; रक्तेन्द्रकोपभाक् P_1T_1 19 cd. ॰स्फटिकाभं तु सादाख्यं शक्तितत्त्वं सित॰] M_1T_1; —P_1

सर्वं व्योमादिकं पृक्तम् † क्षादेराकारभस्मरेत् † ॥ २० ॥

कालानलाद्यनन्तान्ता भुवनाख्या रविप्रभा ।
सूक्ष्माद्यष्टौ तु नीलाभा निवृत्त्याद्याः सितप्रभाः ॥ २१ ॥

चतुर्भुजास्त्रिणेत्राश्च जटामकुटमण्डिताः ।
कपालाक्षधरा दक्षे शूलवज्रधरास्तथा ॥ २२ ॥

[वर्णध्यानम्]

अकारं श्वेतवर्णं तु आकाराद्यं सुनीलकम् ।
कादिक्षान्तात्मकं रक्तं अकारादिप्रभा मता ॥ २३ ॥

[व्योमव्यापिमन्त्रपदानां वर्णाः]

व्योमव्याप्यादिकं सर्वसान्निध्यकरपश्चिमम् ।
पदं रक्तप्रभं ब्रह्मविष्णुरुद्रपदादिकम् ॥ २४ ॥

नवार्णं नीलसंकाशं शब्दशब्दादिकं सितम् ।
ईशानाद्यास्तु यन्मन्त्रवर्णास्ते वक्ष्यमाणवत् ॥ २५ ॥

[सन्ध्यावन्दनम्]

---

20 d. °क्षादेराकारभस्मरेत्] T_1; क्ष्मादेराकारभाक्स्मरेत् M_1; क्ष्मा— दरात — रभा —P_1 21 a. कालानलाद्यनन्तान्ता°] P_1; कालानलाद्यानन्तान्ता M_1; कलानलाध्वादानन्ता T_1 21 b. रविप्रभा] P_1T_1; रविप्रभाः M_1 21 d. निवृत्त्याद्याः] P_1T_1; निवृत्ताद्याः M_1 22 a. चतुर्भुजास्त्रिणेत्राश्च] M_1; चतु° — णेत्राश्च P_1; चतुर्भुजां त्रिनेत्राश्च T_1 22 b. मण्डिताः] M_1P_1; मण्डितः T_1 22 c. °धरा] M_1P_1; धरां T_1 22 d. °स्तथा] M_1T_1; °स्ततः P_1 23 ab. अकारं श्वेतवर्णं तु आकाराद्यं] T_1; अकारं श्वेतवर्णं स्यादाकाराद्यं M_1; अकारं श्वे— राद्यं P_1 23 c. कादिक्षान्तात्मकं] P_1T_1; *om.* M_1 23 cd. °रक्तं अकारादि प्रभा मता] P_1; °रक्तम् कारादिप्रभामता M_1; °रक्तं मकारादि प्रभा मदा T_1 24 ab. सर्वसान्निध्यकर°] *conj.*; सर्वं सान्निध्यकद° M_1; —P_1; सर्वं सान्निध्यं कर° T_1 24 c. पदं] M_1P_1; पद° T_1 25 ab. °संकाशं शब्दशब्दादिकं] P_1T_1; संकाश बशबादिकं M_1 25 b. सितम्] M_1T_1; —P_1 25 c. ईशानाद्यास्तु यन्मन्त्र°] *em.*; ईशानाद्यास्तु ये मन्त्रा M_1; — त्या —P_1; ईशानाद्यस्तु यन्मन्त्र°T_1

ब्रह्माणीं वैष्णवीं रौद्रीं रक्तां शुक्लां सितेतराम्।
प्रातर्मध्याह्नसायाह्ने सन्ध्यां ध्यायेदनुक्रमात्॥ २६॥

[ब्राह्मी सन्ध्या]

रक्तभूषाम्बरां रक्तां जटायज्ञोपवीतिनीम्।
हंसपद्मासनां बालां चतुर्वक्त्रां चतुर्भुजाम्॥ २७॥
स्रुगक्षमालिनीन्दक्षे वामे दण्डकमण्डलुम्।
ब्राह्मीमष्टदृशीं ध्यायेत् प्रातस्तारकितेऽम्बरे॥ २८॥

[वैष्णवी सन्ध्या]

शुक्लाम्बरधरां शुक्लां वनमालोपवीतिनीम्।
तार्क्ष्यपद्मासनासीनामुद्भिन्ननवयौवनाम्॥ २९॥
शङ्खचक्रधरां वामे दक्षिणे सगदाभयाम्।

26–27. ब्राह्मीं च वैष्णवीं ··· चतुर्वक्त्रां चतुर्भुजाम् *Mṛgendrapaddhatiṭīkā* (*MṛPaṬī*), p.70. *Somaśambhupaddhati* (*Soma*), 1:53–54.

27–33b. रक्तभूषांवरां॰ ··· साक्षिण्यः सर्वकर्मणाम् *Kriyākramadyotikā*, p. 28-29.

27c–29b. हंसपद्मासनां ··· वनमालोपवीतिनीम् P_1; Verses 27c–29b T_1 reads after 30b.

---

26 b. रक्तां शुक्लां सितेतराम्] M_1T_1, *MṛPaṬī*, *Soma*; ---P_1 **26 c.** प्रातर्मध्याह्नसायाह्ने] $M_1P_1T_1$, *MṛPaṬī*; प्रातर्मध्याह्नके सायं *Soma* **26 d.** सन्ध्यां] P_1T_1; सन्ध्यं M_1 **27 a.** भूषाम्वरां] P_1T_1; वेषांवरां M_1 **27 ab.** रक्तां जटायज्ञोपवीतिनीम्] M_1, *MṛPaṬī*, *Soma*, *Kriyā*; रक्त ---P_1; रक्तां जटायज्ञोपवीतिनी T_1 **27 c.** पद्मासनां वालां] M_1P_1, *Soma*, *Kriyā*; पद्मासना वाला T_1; पद्मासनासीनां *MṛPaṬī* **27 d.** चतुर्वक्त्रां चतुर्भुजाम्] M_1P_1, *Kriyā*; चतुर्वक्त्रा चतुर्भुजा T_1 **28 b.** वामे दण्डकमण्डलुम्] M_1T_1, *MṛPaṬī*, *Soma*, *Kriyā*; वा ---P_1 **28 c.** ब्राह्मी॰] M_1T_1, *MṛPaṬī*, *Soma*, *Kriyā*; ---P_1 **28 c.** ॰मष्टदृशीं] P_1T_1, *MṛPaṬī*, *Soma*; ॰मष्टमदृशं *Kriyā*, M_1 **29 b.** वनमालोपवीतिनीम्] M_1, *MṛPaṬī*, *Soma*, *Kriyā*; व ---P_1; वलमालोपवीतिनी T_1 **30 a.** ॰धरां] M_1P_1, *Kriyā*; धरं T_1 **30 b.** दक्षिणे सगदाभयाम्] M_1, *MṛPaṬī*, *Soma*, *Kriyā*; दक्षि ---P_1; दक्षिणे सगदाभया T_1

ध्यायेन्माध्यन्दिने देवीं वैष्णवीं सर्वभूषणाम्॥ ३०॥

[रौद्री सन्ध्या]

नीलोत्पलदलाभासां किञ्चिच्चलितयौवनाम्।
चतुर्भुजां त्रिणेत्रां च जटाखण्डेन्दुमण्डिताम्॥ ३१॥
त्रिशूलाक्षधरां दक्षे वामे साभयशक्तिकाम्।
रौद्रीं ध्यायेद्वृषाब्जस्थां कालेऽर्धास्तमितारुणे॥ ३२॥
कृष्णाजिनधराः सर्वाः साक्षिण्यः सर्वकर्मणाम्।
तत्प्रभामण्डलाभोगप्रविष्टां स्वतनुं स्मरेत्॥ ३३॥

[निष्कला सन्ध्या]

ज्ञानिनां परमाः सन्ध्याश्चतस्रोऽभिदधेऽधुना।
एकैवानेकतां याति शिवशक्तिरुपाधितः॥ ३४॥

मृणालतन्तुवत्तन्वी रक्ता शुक्ला सितेतरा।

---

35. मृणालतन्तुवत्तन्वी … या निशीथे विभाव्यते *Kriyākramadyotikā*, p. 32.

---

30 c. ध्याये°] M_1T_1, *MṛPaṬī*, *Soma*, *Kriyā*; — ये° P_1 30 d. भूषणाम्] P_1T_1; भूषणा M_1 31 a. °भासां] M_1P_1, *Kriyā*; °भासा T_1 31 b. चलितयौवनाम्] M_1T_1, *MṛPaṬī*, *Soma*, *Kriyā*; —P_1 31 c. चतुर्भुजां] T_1, *MṛPaṬī*, *Soma*, *Kriyā*; चतुर्भुजद्वा M_1; — जां P_1 31 d. °मण्डिताम्] M_1P_1, *Kriyā*; मण्डिता T_1 32 a. °धरां] M_1T_1, *Kriyā*; °धरं P_1 32 ab. दक्षे वामे साभयशक्तिकाम्] M_1, *MṛPaṬī*, *Soma*, *Kriyā*; द —P_1; दक्षे वामे साभयशक्तिका T_1 32 c. रौद्रीं ध्यायेद्वृषाब्जस्थां] M_1, *MṛPaṬī*, *Soma*, *Kriyā*; —P_1; रौद्रीं ध्यायेद्वृषारूढां T_1 32 d. कालेऽर्धास्तमितारुणे] M_1, *Kriyā*; काले चास्तमितारुणे P_1; कालेर्धास्तिमितारुणे T_1 33 a. सर्वाः] M_1P_1, *Kriyā*; सर्वे T_1 33 b. सर्वकर्मणाम्] M_1P_1, *Kriyā*; सर्वकर्मणः T_1 33 cd. °मण्डलाभोगप्रविष्टां स्वतनुं] *MṛPaṬī*, *Soma*; °मण्डलभोगप्रविष्टां स्वतनुं M_1; — तनुं P_1; °मण्डलाभोगाप्रविशस्वतनुं T_1 34 a. परमा°] M_1P_1; परम° T_1 34 b. °भिदधेऽधुना] P_1T_1, *MṛPaṬī*, *SomaKashmir*; °भिदधातुराः M_1; विदधेऽधुना *SomaPdy*, *SomaDeva* 34 cd. °कतां याति शिवशक्तिरुपाधितः] M_1, *MṛPaṬī*, *Soma*; — °धितः P_1; °कतां याति शिवशक्तिरुपासितः T_1 , 35 a. मृणाल°] M_1P_1, *Kriyā*; ⊔T_1 35 b. रक्ता] M_1P_1, *Kriyā*; रक्त° T_1

तुर्या त्वरूपा कृष्णा वा या निशीथे विभाव्यते॥ ३५॥

हृद्बिन्दुब्रह्मरन्ध्रेषु परे चैता स्थिताः क्रमात्।
तिस्रस्सत्त्वादिसंयुक्तास्स्वतुर्थी गुणवर्जिता॥ ३६॥

सूर्याचन्द्रमसौ रक्तौ द्वे सन्ध्ये प्राणयोगिनाम्।
शिवबोधपरा या तु सा सन्ध्या परमोच्यते॥ ३७॥

[गायत्री]

तप्तकाञ्चनसङ्काशां समयस्थापिनीं पराम्।
चतुर्भुजां त्रिणेत्रां च गायत्रीं सततोदिताम्॥ ३८॥

वराभयाक्षमालां च कुण्डिकां बिभ्रतीं करैः।

[शिवसूर्यः]

सर्वानेतान्परित्यज्य देवान् ऋषिपुरोगमान् ॥ ३९॥

36cd. तिस्रस्सत्त्वादिसंयुक्तास्स्वतुर्थी गुणवर्जिता *Kriyākramadyotikā*, p. 29.

38–39b. तप्तकाञ्चनसङ्काशां ··· कुण्डिकां विभ्रतीं करैः *Kriyākramadyotikā*, p. 34.

39c–40b. तस्मात्सर्वान्परित्यज्य देवान् ब्रह्मपुरोगमान्।
आराधयेद्विरूपाक्षमादित्यान्तरवर्तिनम्॥ *Jñānaratnāvalī*, p. 23 of GOML R 14898.

---

35 c. कृष्णा वा] $M_1P_1T_1$, *MṛPaṬī*, *Kriyā*; कृष्णाभा *SomaPdy*; कृष्णां वा *SomaKashmir* **35 d.** विभाव्यते] P_1T_1; विभावत M_1 **36 b.** °चैता स्थिताः क्रमात्] M_1P_1; चैकास्थिताक्रमात् T_1; चैताः स्थिताः क्रमात् *Soma*; चैताः क्रमात् सदा *MṛPaṬī* **36 d.** °स्वतुर्थी गुणवर्जिता] M_1T_1, *MṛPaṬī*, *Soma*, *Kriyā*; —P_1 **37 a.** सूर्याचन्द्रमसौ रक्तौ] *conj.*; सूर्यचन्द्रमसौ रक्तौ M_1; सूर्यचन्द्रमसोरन्ते P_1; सूर्याचन्द्रमसारन्ते T_1 **37 c.** शिवबोधपरा या तु] P_1; शिवबोधकरा या तु M_1; शिवबोधपराधन्तु T_1; शिवबोधः परो यस्तु *SomaKashmir* **37 d.** सा सन्ध्या परमोच्यते] M_1, *Soma*; —P_1; स सन्ध्या परमोच्यते T_1 **38 a.** तप्त°] M_1T_1; —P_1 **38 a.** °सङ्काशां] M_1P_1; सङ्काश T_1; वर्णाभां *Kriyā* **38 b.** °स्थापिनीम्] $M_1P_1T_1$; स्थापनीम् *Kriyā* **38 d.** सततोदिताम्] *conj.*; सददोदिताम् P_1; सततोद्गृतां M_1; सदनोदितां T_1; सदतोदिताम् *Kriyā* **39 a.** वराभयाक्षमालां च] M_1P_1, *Kriyā*; वराभयाक्षमालाब्ज° T_1 **39 b.** कुण्डिकां] P_1T_1; गण्डिकां M_1 **39 d.** ऋषिपुरोगमान्] P_1T_1; ब्रह्मपुरोगमान् M_1

आराधयेद्विरूपाक्षमादित्यान्तरवर्तिनम्।

[शिवसूर्यस्यद्वारपालकौ दण्डीपिङ्गलौ]

दण्डी द्वार्दक्षिणे गौरः स्थूलस्तुन्दिलकूर्चवान्॥ ४०॥
मषीभाजनलेखिन्यौ धारयन् हस्तयोर्द्वयोः।
प्राणिनां कर्मसाक्षी च तत्कर्माणि लिखत्यसौ॥ ४१॥
रक्तवर्णः सुवेषाढ्यः सूचीहस्तसमन्वितः।
पिङ्गलो वामपार्श्वे तु प्रतिहारश्च दण्डवान्॥ ४२॥

[गणेशध्यानम्]

कृष्णवर्णः करद्वन्द्वधृतदण्डश्च वामनः।
रक्तपद्मासनासीनं दन्तं पाशाङ्कुशौ फलम्॥ ४३॥
दधानं च चतुर्हस्तैर्गजवक्त्रं गणाधिपम्।

[गुरुध्यानम्]

जटामकुटशोभाढ्यं भस्मपाण्डुरविग्रहम्॥ ४४॥

---

40 c–41b. दण्डी द्वार्दक्षिणे ... हस्तयोर्द्वयोः *MṛPaṬī*, T. 1020, p. 72; *ĀPūPa*, T. 1056, p. 101.

40c–42. दण्डी द्वार्दक्षिणे ... प्रतिहारश्च दण्डवान् *Kriyākramadyotikā*, p. 42.

43cd. रक्तपद्मा॰ ... फलम् *Kriyākramadyotikā*, p. 42.

44–45. दधानं च चतुर्हस्तैर्॰... ॰च्छान्तं परं गुरुम् *Kriyākramadyotikā*, p. 42-43.

41c–42b. प्राणिनां कर्म ... सूचीहस्तसमन्वितः] P_1T_1; *om.* M_1

---

40 b. ॰वर्तिनम्] M_1P_1; वर्तिनः T_1 **40 d.** ॰स्थूलस्तुन्दिल॰] P_1T_1; ॰स्थूलतुनिल॰ M_1; ॰स्तुन्दिलोलम्ब॰ *Kriyā* **41 a.** मषी॰] M_1P_1, *Kriyā*; माष॰ T_1 **41 b.** धारयन्] M_1P_1, *Kriyā*; धारयेत् T_1 **41 d.** लिखत्यसौ] *Kriyā*; लिखिन्यसौ $M_1P_1T_1$ **42 ab.** रक्तवर्णः सुवेषाढ्यः सूचीहस्तसमन्वितः] P_1, *Kriyā*; *om.* T_1 **42 d.** प्रतिहारश्च] M_1P_1; प्रतिहारश्च T_1 **43 b.** ॰धृतदण्डश्च] P_1; ॰श्रुतदण्डश्च M_1; ॰धृतदण्डश्च T_1 **44 b.** ॰गजवक्त्रं] M_1P_1, *Kriyā*; ॰जगवस्त्रं T_1 **44 d.** ॰पाण्डुर॰] P_1T_1; ॰पाण्डर M_1, *Kriyā*

योगपट्टयुतं ब्रह्मसूत्रं नाभिस्थलोपरि।
कृतयोगाख्यमुद्रां च ध्यायेच्छान्तं परं गुरुम्॥ ४५॥

[प्रभूताख्यं सूर्यस्यासनम्]

आसनं कल्पयेत् पश्चात् सिंहपीठोर्ध्वपङ्कजम्।
प्रभूतं मध्यमे न्यस्येच्चतुरश्रं समस्तधृक्॥ ४६॥

विमलं सारमाराध्यं सुखं परमपूर्वकम्।
आग्नेयादिषु कोणेषु सिंहपादाकृतीन् स्मरेत्॥ ४७॥

तन्मध्ये पङ्कजं रक्तम् अष्टदिग्दलशोभितम्।
केसरेषु च दीप्तादिशक्तीरष्टौ प्रकल्पयेत्॥ ४८॥

पूर्वादीशानपर्यन्तम् मध्ये स्यात् सर्वतोमुखी।
दीप्तदीपशिखाकारा ध्यातव्या नव शक्तयः॥ ४९॥

पद्मचामरहस्ताश्च रक्तास्सर्वाङ्गभूषणाः।

[सूर्यादिनवग्रहध्यानम्]

49c–58b. दीप्तदीपशिखाकारा° … राहुं च विकृताननम् *Kriyākramadyotikā*, p. 42-44.

---

45 c. कृतयोगाख्यमुद्रां च] T_1, *ĀPūPa*; कृतयोगख्यमुद्राञ्च M_1; —P_1; कृतयोगाख्यमुद्रञ्च *Kriyā* **45 d.** °च्छान्तं परं गुरुम्] *conj.*; °च्छान्तगुरुपरं M_1; °च्छान्तपर गुरुं P_1; °च्छान्तपरं गुरुम् T_1; °च्छन्तं गुरुं परं *Kriyā* **46 b.** सिंह°] $M_1P_1T_1$; सिंहे° *ĀPūPa* **46 c.** प्रभूतं] M_1P_1; प्रभूत° T_1 **46 cd.** न्यस्येच्चतुरश्रं समस्तधृक्] $M_1P_1T_1$; न्यस्य चतुर्दिक्षु समन्ततः *ĀPūPa* **47 b.** °पूर्वकम्] $M_1P_1T_1$; °पूरकम् *ĀPūPa* **47 d.** आग्नेयादिषु] P_1T_1; आग्नेयादीश M_1 **47 d.** पादाकृतीन् स्मरेत्] *conj.*; पादकृति स्मरेत् M_1; पादाकृतिं स्मरेत् P_1T_1; पादाकृतीन् हृदा *ĀPūPa* **48 d.** केसरेषु च दीप्तादि°] P_1T_1; दीप्तादि केसरेषु च M_1 **49 b.** स्यात् सर्वतोमुखी] P_1T_1; स्सर्वतोमुखाः M_1 (unmetrical); सा सर्वतोमुखी *ĀPūPa* **49 c.** दीप्तदीप°] M_1P_1, *Kriyā*; दीप्तादिव° T_1 **49 c.** °शिखाकारा] $M_1P_1T_1$, *Kriyā*; निभाकारा *Soma* **50 a.** °हस्ताश्च] M_1T_1, *Kriyā*; हस्तास्य P_1 **50 b.** °भूषणाः] P_1, *Kriyā*; भूषणा M_1; भूषणः T_1

धवळाम्भोरुहारूढं डाडिमीकुसुमप्रभम्॥ ५०॥

स्फुरद्रक्तमहातेजोवृत्तमण्डलमध्यगम्।
अंसासक्तपुटश्वेतसनालाब्जकरद्वयम्॥ ५१॥

एकास्यं चिन्तयेद्भानुं द्विनेत्रं रक्तवाससम्।
सौम्यानि रक्तवर्णानि वरदाब्जकराणि च॥ ५२॥

भूषितानि द्विहस्तानि भानोरङ्गानि भावयेत्।
विद्युत्पुञ्जनिभञ्चास्त्रमुग्रदंष्ट्राकरालिनम्॥ ५३॥

सोमं कुमुदकुन्दाभं बुधं चामीकरप्रभम्।
गुरुं गोरोचनाभासं शुक्रं गोक्षीरसन्निभम्॥ ५४॥

रक्तमङ्गारकं ध्यायेद्राजावर्तनिभं शनिम्।
कृष्णं कृताञ्जलिं राहुं केतुं धूम्राहिसन्निभम्॥ ५५॥

कामरूपधरान् सर्वान् दिव्याम्बरविभूषणान्।
वामोरुन्यस्तहस्तांश्च दक्षहस्ताभयप्रदान्॥ ५६॥

सितपद्मकरं सोमं राहुकेतू कृताञ्जली।

57–58b. सितपद्मकरं सोमं … राहुं च विकृताननम्] T_1P_1; *om.* M_1

---

50 c. °अम्भोरुहा°] P_1T_1; °अंभोरुहां M_1 **50 d.** डाडिमी°] P_1T_1, *ĀPūPa*, *Kriyā*; ढाडिमी° M_1; दाडिमी° *Soma* **51 c.** अंसासक्तपुटश्वेत°] M_1; कासासक्तस्फुटश्वेत° P_1; हंसासक्तस्फुटश्वेत° T_1, *Kriyā*; हंसासक्तस्फुटस्वेत° *ĀPūPa* **52 d.** वरदाब्ज°] M_1P_1, *Kriyā*; भूषिताब्ज° T_1 **53 c.** °पुञ्ज°] M_1P_1, *Kriyā*; °पञ्च° T_1 **53 d.** °मुग्र°] M_1T_1, *Kriyā*; °मुग्रं° P_1 **53 d.** °करालिनम्] P_1, *Kriyā*; °करालिकं M_1; °करालनम् T_1 **56 b.** दिव्याम्बरवि°] P_1; दिव्याभरण° M_1T_1, *Kriyā* **56 c.** °हस्तांश्च°] M_1P_1, *Kriyā*; °हस्तश्च° T_1 **57 a.** °केतू°] *Kriyā*; °केतु° P_1T_1 **57 b.** °कृताञ्जली] P_1, *Kriyā*; °कृताञ्जलिं T_1

अर्धकायोर्ध्वकेशौ च रक्तस्रग्रक्तलोचनौ॥ ५७॥

शनिं दंष्ट्राकराळं च राहुं च विकृताननम्।

[तेजश्चण्डध्यानम्]

चण्डं रक्तं कराळास्यमस्त्राभयकरद्वयम्॥ ५८॥

दंष्ट्राकराळदीप्तास्यं जटिलं रक्तवाससम्।

दधानं टङ्कमम्भोजं तेजश्चण्डेश्वरं यजेत्॥ ५९॥

[द्वारपूजा]

लम्बोदरं श्यामनिभं गणेशं कुठारमक्षस्रजमूर्ध्वगाभ्याम्।

सलड्डुकं दन्तमधःकराभ्यां वामेतराभ्यां च दधानमीडे॥ ६०॥

शुक्लां शुक्लाम्बरामक्षमालापुस्तकधारिणीम्।

सव्यवामकराभ्यां च सुप्रसन्नां सरस्वतीम्॥ ६१॥

वामदक्षिणहस्ताभ्यां दधतीं श्रीफलाम्बुजे।

हेमाभां सघटेभाभ्यां प्लाव्यमानां महाश्रियम्॥ ६२॥

58cd. चण्डं रक्तं कराळास्यमस्त्राभयकरद्वयम् *Kriyākramadyotikā*, p. 51.

60–66. लवोदरं ⋯ यमुनां च विभावयेत् *Kriyākramadyotikā*, p. 51-52.

---

57 d. रक्तस्रक्रक्तलोचनौ] *conj.*; *क्तस्यस्य— लोचनौ P_1; रक्तसृक्रक्तलोचनः T_1; रक्तसृक्रक्तलोचनौ *Kriyā* **58 a.** कराळं च] P_1; कराळं तु *Kriyā*; *om.* T_1(eyeskip) **58 b.** राहुञ्च विकृताननम्] *Kriyā*; राहुञ्चालक्त—P_1; *om.* T_1(eyeskip) **58 c.** चण्डंरक्तं] M_1P_1, *Kriyā*; *om.* T_1(eyeskip) **58 c.** कराळास्यम्] M_1T_1, *Kriyā*; कराळ-—P_1 **58 d.** °स्त्राभयकर°] P_1; °ब्जाभयकर° T_1M_1, *Kriyā* **59 a.** °कराळ°] P_1; °कराळं M_1T_1 **59 c.** टङ्कमम्भोजं] M_1P_1; सङ्गमभोज° T_1 **59 d.** यजेत्] P_1T_1; स्मरेत् M_1 **60 a.** श्यामनिभं] M_1P_1, *Kriyā*; श्यामतनुं T_1 **60 b.** °गाभ्याम्] M_1T_1, *Kriyā*; °काभ्यां P_1 **60 c.** सलड्डुकं] P_1T_1; सुलडकं M_1; सल्लड्डुकं *Kriyā* **60 c.** °मधः°] M_1P_1, *Kriyā*; °मधा° T_1 **61 a.** शुक्लाम्बरामक्ष°] M_1P_1, *Kriyā*; शुक्लाम्वराक्षं च T_1 **61 b.** °धारिणीम्] P_1T_1; °धारिणी M_1 **61 d.** सरस्वतीम्] P_1T_1; सरस्वती M_1 **62 d.** °मानां महाश्रियं] *Kriyā*; °माना महाश्रियम् M_1; °मानां महां श्रियम् P_1; °मानं महाश्रियं T_1

रक्तं त्रिणेत्रं जटिलं सव्यवामकरद्वये।
अक्षमालां त्रिशूलं च दधानं नन्दिकेश्वरम्॥ ६३॥

मकरासनगां गङ्गां सव्यवामकरद्वये।
नीलोत्पलं पूर्णकुम्भं दधतीं शुक्लरूपिणीम्॥ ६४॥

कृष्णं त्र्यक्षं महाकाळं सव्यवामकरद्वये।
कपालं च त्रिशूलं च दधानं विकटाननम्॥ ६५॥

श्यामां कूर्मस्थितां वामसव्यहस्तद्वये घटम्।
नीलोत्पलञ्च बिभ्राणां यमुनाञ्च विभावयेत्॥ ६६॥

चतुर्भुजं चतुर्वक्त्रं प्रदीप्ताग्निसमप्रभम्।
वरदञ्च तथा शक्तिमभयं शूलमेव च॥ ६७॥

बिभ्राणं देहळीमध्ये शस्त्रराजमनुस्मरेत्।

[वास्तुपतिगणेशलक्ष्मीगुरुपद्धतिध्यानानि]

हंसस्थं तुन्दिलं गौरं सश्मश्रुचतुराननम्॥ ६८॥
दधानं दक्षिणे वामे दण्डाक्षस्रुक्कमण्डलुम्।

69ab. हंसस्थं ... कमण्डलुम्, *Kriyākramadyotikā*, p. 55, 217.

64ab. After savyavāmakaradvaye T_1 repeats the above line i.e. 63cd अक्षमालां त्रिशूलं ... नन्दिकेश्वरम्॥

---

63 a. त्रिणेत्रं] P_1T_1; त्रिणेत्र° M_1 **63 c.** अक्षमालां] M_1, *Kriyā*; अक्षमाला° P_1T_1 **63 c.** °त्रिशूलं च] P_1, *Kriyā*; °त्रिशूलां च M_1T_1 **65 b.** सव्यवाम°] $M_1P_1T_1$; °वामसव्य° *Kriyā* **66 c.** बिभ्राणां] M_1P_1, *Kriyā*; बिभ्राणं T_1 **67 c.** वरदञ्च तथा] P_1T_1; वरदञ्च गदां M_1 **68 a.** देहळी°] M_1P_1; देहळ° T_1 **68 b.** °मनुस्मरेत्] M_1P_1; °मनुस्मरन् T_1 **68 c.** तुन्दिलं गौरं] M_1P_1, *Kriyā*; तुन्दिनं गौर T_1 **68 d.** °श्मश्रु°] *Kriyā*; °स्मश्रू° $M_1P_1T_1$ **69 b.** दण्डाक्ष°] M_1P_1, *Kriyā*; दण्डाक्षं T_1 **69 b.** °कमण्डलुम्] P_1T_1; °कमण्डलं M_1

गणेशं वायुदिग्भागे प्रोक्तरूपमथोत्तरे॥ ६९॥
उक्तरूपां महालक्ष्मीमीशाने गुरुपद्धतिम्।
सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम्॥ ७०॥
गुहं विष्णुञ्च धातारं गुरून् सप्त स्मरेत् पुनः।

[शिवासनपूजा]

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम्॥ ७१॥
मौलौ बीजाङ्कुराकारां वरदामभयप्रदाम्।
पाशाङ्कुशधरां शक्तिं क्रियामाधाररूपिणीम्॥ ७२॥
पृथ्वीकन्दं कलान्तैकनाळकं भावकण्टकम्।
क्षुब्धमायामहापद्ममनेकदळसङ्कुलम्॥ ७३॥
अनन्तमासनमिदं हरितालसमप्रभम्।
तन्मध्यगमनन्तेशं विभुं व्याप्त्या स्थितन्त्वधः॥ ७४॥

70c–71b. सदाशिव॰ ... स्मरेत् पुनः *Pañcāvaraṇastava*, verse 16.

71c–73. अधः कूर्मशिला ... ॰दलसंकुलम् *Kriyākramadyotikā*, p. 87-88.

74cd. तन्मध्यगमनन्तेशं शुद्धं व्याप्त्यास्थितन्त्वधः *Kriyākramadyotikā*, p. 88.

70c–71b. सदाशिवमनन्तं ... सप्त स्मरेत् पुनः] P_1T_1; *om.* M_1

---

70 a. उक्तरूपां] P_1; उक्तरूपा M_1; उक्तरूपं T_1 70 d. अम्बिकाम्] P_1, *Pañca*; अम्बिका T_1 71 a. विष्णुञ्च] P_1, *Pañca*; कृष्णञ्च T_1 71 b. स्मरेत् पुनः] P_1; समाश्रये T_1; समाश्रये *Pañca* 71 c. ॰सीनां] M_1P_1, *Kriyā*; ॰सीनं T_1 71 d. ॰विग्रहाम्] M_1P_1, *Kriyā*; ॰विग्रहं T_1 72 a. मौलौ] P_1T_1; मौलि M_1 72 b. वरदामभयप्रदाम्] P_1T_1; वरदाभयप्रदाम् M_1 (unmetrical) 72 c. ॰शक्तिं] M_1P_1, *Kriyā*; ॰शक्ति T_1 73 a. पृथ्वीकन्दं] T_1M_1, *Kriyā*; पृक्तकन्दं P_1 73 a. कलान्तैक॰] M_1P_1, *Kriyā*; कालान्तैकं T_1 73 d. ॰सङ्कुलम्] P_1T_1; ॰शोभितम् M_1 74 b. ॰समप्रभम्] M_1T_1; ॰प्रभामतम् P_1 74 c. अनन्तेशं विभुं] P_1; अनन्तेशं प्रभुं M_1; अनन्तेज प्रभुं T_1; अनन्तेशं शुद्धं *Kriyā* 74 d. स्थितन्त्वधः] *Kriyā*; ॰स्थितन्ततः M_1; ॰स्थितन्त्वतः P_1T_1

[धर्मादिपादुकाः]

श्वेतश्चतुर्मुखश्चाष्टभुजन्द्वादशलोचनम् ।
चतुर्थमण्डलेशोक्तभूषाधार्यायुतं स्मरेत् ॥ ७५ ॥

तस्य प्रभूता धर्माद्याश्चतुष्कोणस्थपादुकाः ।
सिंहाकाराः सितार्कांशुपीतकृष्णनिभाः शुभाः ॥ ७६ ॥

अन्योन्यवीक्षणैः सिंहैरनेकैः परिवारिताः ।
दंष्ट्राकराळवदनास्त्रिणेत्रा भीमविग्रहाः ॥ ७७ ॥

कृतत्रेतादिरूपेण शिवस्यासनपादुकाः ।
आग्नेय्यादीशपर्यन्तं कोणेषु च यथाक्रमम् ॥ ७८ ॥

[अधर्मादि गात्राणि]

अधर्माज्ञानावैराग्यानैश्वर्याख्यानि तानि तु ।
चित्रवर्णस्वरूपाणि दिक्षु गात्राणि कल्पयेत् ॥ ७९ ॥

कृष्णश्वेतं पूर्वभागे श्वेतरक्तं तु दक्षिणे ।
रक्तपीतं पश्चिमतः पीतकृष्णमुदग्दिशि ॥ ८० ॥

78ab. कृतत्रेतादि° ... °पादुकाः, *Kriyākramadyotikā*, p. 88.

80–82. कृष्णश्वेतं पूर्वभागे ... मस्तकान्नररूपिणः, *Kriyākramadyotikā*, p. 88.

---

75 c. °शोक्त°] M_1P_1; °शक्तु° T_1 **75 d.** भूषाधार्यायुतं] P_1T_1; भूम्याधारमनु M_1 **76 a.** °धर्माद्या°] M_1P_1; °धर्माद्य° T_1 **76 b.** °पादुकाः] P_1; °लादुकाः M_1; °पादुकां T_1 **76 d.** °निभाः शुभाः] M_1P_1; °निभाशुभा T_1 **77 a.** °वीक्षणैः] M_1T_1; °वीक्षणाः P_1 **77 b.** परिवारिताः] P_1; परिवारिताम् M_1; परिपारितः T_1 **77 c.** °वदनास्त्रि°] P_1; °वदनात्रि° M_1; °वदनं त्रि° T_1 **77 d.** °विग्रहाः] M_1P_1; °विग्रहा T_1 **78 b.** °पादुकाः] M_1P_1; पादुका T_1; °पादुकान् *Kriyā* **79 a.** °वैरा-ग्या°] M_1P_1; °वैराग्यं T_1 **80 a.** कृष्ण°] P_1T_1; कृष्णम् M_1 **80 b.** तु] $M_1P_1T_1$; च *Kriyā* **80 c.** रक्तपीतं] M_1P_1, *Kriyā*; °रक्तबीजं T_1 **80 d.** पीतकृष्णमुदग्दिशि] P_1T_1; पीतन्तुकुमुर्दशि M_1

चत्वारि गात्रकाण्येवमनन्तेशबलानि तु ।

यद्वा—

गात्रकान् स्फटिकप्रख्यान् त्र्यक्षान् सिंहशिरोधृतान्॥ ८१॥

स्तब्धबाहुशिरोग्रीवान् पादुकासक्तमस्तकान्

अग्रगात्रकपादस्थमस्तकान्नररूपिणः॥ ८२॥

[छदने]

अधश्छदनमूर्ध्वञ्च रक्तशुक्लं विचिन्तयेत् ।

नैर्ऋत्यामीशदिग्भागे मायाविद्यात्मकं परम्॥ ८३॥

[पद्मम्]

माणिक्यसदृशं कन्दं नाळन्नीलसमप्रभम् ।

कण्टकन्तु प्रवाळाभं दळं रजतसन्निभम्॥ ८४॥

केसरं हेमवर्णाभं अग्रे मुक्तावलीयुतम् ।

विद्येश्वरोत्पन्नदलं शुद्धविद्यात्मपङ्कजम्॥ ८५॥

[कर्णिका]

84–85b. माणिक्कसदृशं ... °मुक्तावलीयुतम् *Kriyākramadyotikā*, p. 88-89b.

---

81 d. चत्वारि] M_1P_1, *Kriyā*; चत्वारो T_1 81 यद्वा] M_1; *om.* P_1T_1 81 c. गात्रकान्] M_1P_1; गात्रजान् T_1 81 d. त्र्यक्षान्] M_1P_1, *Kriyā*; त्र्यक्षः T_1 82 a. स्तब्ध°] M_1P_1, *Kriyā*; तद्ब° T_1 82 b. पादुकासक्तमस्तकान्] M_1P_1, *Kriyā*; पादुकान् सक्तमस्तकान् T_1 82 cd. °कपादस्थमस्तकान्नररूपिणः] M_1, *Kriyā*; °कपादस्थमस्तक—रूपिणः P_1; पदन्यस्तमस्तकानररूपिणी T_1 83 b. रक्तशुक्लम्] P_1T_1; रक्तं शुक्लं M_1 84 a. माणिक्य°] *Kriyā*; माणिक्क° $M_1P_1T_1$ 84 a. °कन्दं] M_1P_1; कान्तं T_1 84 b. समप्रभम्] P_1T_1; मणिप्रभम् M_1 84 c. कण्टक°] $M_1P_1T_1$; अङ्कुर° *Kriyā* 84 d. रजतसन्निभम्] M_1; रजतसमप्रभम् P_1; रजतप्रभम् T_1; रजतसप्रभम् *Kriyā*; 85 a. °मुक्तावलीयुतम्] *Kriyā*; °मुक्ताकृतीयुतम् $M_1P_1T_1$ 85 c. विद्येश्वरोत्पन्न°] P_1; विद्येश्वरेत्पल° M_1; विद्येश्वरोत्पल° T_1 85 d. °विद्यात्मपङ्कजम्] M_1; °विद्यामयं अजम् P_1; °विद्यामयं गतम् T_1

तप्तचामीकरच्छायां पञ्चाशद्बीजगर्भिताम् ।
केसराणाञ्चतुष्षष्ठ्या कर्णिकां पूजयेत्ततः ॥ ८६ ॥

[वामादिनवशक्तयः]

उद्यद्दिनकराभासास्त्रिणेत्राश्च चतुर्भुजाः ।
जटामकुटखण्डेन्दुमण्डिता धृतचामराः ॥ ८७ ॥
वरदाभयहस्ताश्च शिवासक्तकराम्बुजाः ।
वामाद्याश्शक्तयश्चाष्टौ केसरेषु च पूर्वतः ॥ ८८ ॥
गोक्षीरधवळां शक्तिं कर्णिकायां मनोन्मनीम् ।

[मण्डलत्रयम्]

दळाग्रपृक्तं सूर्यस्य मण्डलं स्वर्णभास्वरम् ॥ ८९ ॥
ब्रह्मा चतुर्मुखः पीतश्चतुर्दोर्दण्डमण्डितः ।
स्रुग्दण्डाक्षकुशोपेतः सूर्यमण्डलमध्यगः ॥ ९० ॥
केसराग्रे तु सोमस्य मण्डलं श्वेतभास्वरम् ।

86–88b. तप्तचामीकर° ... शिवासक्तकराम्बुजाः *Kriyākramadyotikā*, p. 89.

89ab. गोक्षीरधवळां शक्तिं कर्णिकायां मनोन्मनीम् *Kriyākramadyotikā*, p. 89.

90. ब्रह्मा चतुर्मुखः ... °दलमध्यगः *Kriyākramadyotikā*, p. 89.

---

86 a. °च्छायां] P_1, *Kriyā*; °च्छाया T_1 86 b. °बीजगर्भिताम्] P_1, *Kriyā*; °वि-
त्गर्भिताम् M_1; °बीजगर्भितं T_1 86 c. चतुष्षष्ट्या] P_1T_1; चतुष्षष्ठि° M_1 86 d. °क-
र्णिकां] M_1P_1, *Kriyā*; कर्णिका T_1 87 a. °भासा°] M_1P_1, *Kriyā*; भासं T_1
87 b. त्रिणेत्राश्च चतुर्भुजाः] M_1P_1, *Kriyā*; त्रिणेत्राश्च चतुर्भुजा T_1 87 cd. जटाम-
कुटखण्डेन्दुमण्डिताधृतचामराः] M_1P_1, *Kriyā*; *om.* T_1 88 c. वामाद्याश्शक्तयश्चाष्टौ]
T_1; वामादिशक्तयश्चाष्टौ M_1; वामाद्याश्शक्तयश्चा—P_1 89 a. °धवळां] M_1P_1, *Kriyā*;
°धवळान् T_1 89 c. °पृक्तं] *conj.*; °वृत्ते M_1; °वृक्ते P_1T_1 89 cd. सूर्यस्य मण्डलं
स्वर्ण°] T_1; सूर्यस्य मण्डलं श्वेत° M_1; सूर्यस्य —श्वेत° P_1 90 a. चतुर्मुखः] M_1P_1,
Kriyā; चतुर्मुखो T_1 90 b. °मण्डितः] M_1P_1, *Kriyā*; °मन्डिता T_1

विष्णुश्चतुर्भुजो माली शङ्खचक्रगदाब्जधृक्॥ ९१॥

नीलाम्बुदप्रतीकाशो गरुडासनसंस्थितः।
कर्णिकाग्रे स्मरेदग्निमण्डलं रक्तभास्वरम्॥ ९२॥

अग्निमध्ये स्थितं रुद्रं नीलकण्ठं त्रिलोचनम्।
व्याख्यामुद्रानलं ज्ञानं शूलहस्तं चतुर्भुजम्॥ ९३॥

सर्वालङ्कारसंयुक्तं नागयज्ञोपवीतिनम्।

[कुटिला]

क्षीरश्रेणिनिभां मध्ये कर्णिकां कुटिलात्मिकाम्॥ ९४॥

[सदाशिवः]

शक्तेश्च मण्डलासीनं व्याळयज्ञोपवीतिनम्।
चन्द्रार्धशेखरं त्र्यक्षं शुद्धस्फटिकनिर्मलम् ॥ ९५॥

खड्गं त्रिशूलबाणाक्षं मालाभयकरान्वितम्।

91cd. विष्णुश्चतुर्भुजो माली शंखचक्रगदाब्जधृक् *Kriyākramadyotikā*, p. 89.

92ab. नीलांवुदप्रतीकाशो गरुडासन संस्थितः *Kriyākramadyotikā*, p. 90.

93–94b. अग्निमध्ये स्थितं … नागयज्ञोपवीतिनम् *Kriyākramadyotikā*, p. 90.

95–97b. शक्तेश्च मण्डलासीनं … गजचर्मपरिच्छदम् *Kriyākramadyotikā*, p. 90.

---

92 a. °प्रतीकाशो] $M_1P_1T_1$; °प्रतीकाशः *Kriyā* 92 b. गरुडासनसंस्थितः] $M_1P_1T_1$; सोममण्डल मध्यगः *Kriyā* 92 c. स्मरेदग्नि°] P_1; स्मरेदद्रुं M_1; स्मरं रुद्रं T_1 93 a. °मध्ये°] $M_1P_1T_1$; °मध्य° *Kriyā* 93 c. ज्ञानं] $M_1P_1T_1$; ज्ञान° *Kriyā* 94 ab. °कारसंयुक्तं नाग°] $M_1P_1T_1$; °कारिणं नाग राज° *Kriyā* 94 c. °निभां] P_1; °निभं M_1; °निभा T_1 95 a. शक्तेश्च मण्डलासीनं] M_1T_1, *Kriyā*; शक्तेश्चण्डफलासीनं P_1 95 d. निर्मलम्] M_1T_1, *Kriyā*; °सन्निभम् P_1 96 a. खड्गं] $M_1P_1T_1$; खड्ग° *Kriyā* 96 a. °वाणाक्षं] P_1; वाणाक्ष° M_1, *Kriyā*; °दण्डाक्षम् T_1 96 b. °भयकरान्वितम्] *ĀPūPa*, *Kriyā*; °भयानिविभृतम् M_1; °भयानिभृतम् P_1; °व्यग्रभयान्वितम् T_1

कमण्डलुधरं देवं वरारविन्दधारिणम्॥ ९६॥

दक्षवामक्रमात्सिंहगजचर्मपरिच्छदम्।
क्षित्यादिकुटिलाप्रान्तमेकं व्याप्तिकमासनम्॥ ९७॥

शक्तिं शिवासनं ध्यायेत् सूर्यकोटिसमप्रभाम्।
द्विरभ्यासपदाविष्टामुद्यद्दिनकरप्रभाम्॥ ९८॥

मूर्तिं विभागरहितां लिङ्गभावे विभावयेत्।

[ब्रह्मकलाः]

ईशानमूर्धा पुंवक्त्रो घोरहृद्वामगुह्यकः॥ ९९॥

सर्वाङ्गसिद्धये सद्यः कलाभेदेन कल्पयेत्।
शशिन्यादिकलाः पञ्चब्रह्माद्याश्चैव मूर्त्तयः॥ १००॥

शक्तयोऽभीतिवरदाः पाशाङ्कुशधरास्ततः।
शशिनी चोर्ध्वमूर्द्धा स्यात् पूर्वमूर्धा गदा भवेत्॥ १०१॥

इष्टा च दक्षमूर्धा स्यात् सौम्यमूर्धा मरीचिका।

99c–11b. ईशानमूर्धा ... विज्ञेयो निष्कलः शिवः *Kriyākramadyotikā*, p. 97.

---

96 c. कमण्डलु°] M_1T_1, *Kriyā*; विभूतम् कमण्डलु° P_1 96 d. वरारविन्द°] $M_1P_1T_1$, *Kriyā*; वरांबुरुह° *ĀPūPa* 97 d. °मेकं] P_1; °मेवं M_1T_1 98 c. °पदाविष्टा°] P_1T_1; °पदाविष्ट° M_1 98 d. °प्राभम्] T_1; °प्रभं M_1P_1 99 a. विभाग°] M_1T_1; विभागे P_1 99 a. °रहिताम्] M_1P_1; °रहिता T_1 99 d. °गुह्यकः] M_1P_1, *Kriyā*; °गुह्यकं T_1 100 a. सर्वाङ्ग°] M_1P_1, *Kriyā*; सर्वांगं T_1 100 b. °भेदेन] M_1P_1, *Kriyā*; भौदन T_1 100 d. ब्रह्माद्याश्चैव] M_1; °ब्रह्माभाश्चैव P_1; °ब्रह्मभाश्चैव T_1 101 a. शक्तयोऽभीतिवरदाः] M_1P_1; शक्ति*भीतिपादः T_1 101 b. °धरास्ततः] P_1; धरास्तथा M_1; धरस्तधः T_1 101 c. शशिनी चोर्ध्वमूर्द्धास्यात्] M_1P_1; शशिन्ये चोर्ध्वमूर्द्धा च T_1; शशिन्येवोर्ध्वमूर्धा स्यात् *Kriyā* 101 d. °मूर्धा गदा] *conj.*; मूर्ध्वां गदा M_1; मूर्धांगदा P_1, *Kriyā*; मूर्धा गता T_1 102 a. इष्टाच°] P_1, *Kriyā*; इष्टाख्या M_1T_1

ज्वालिनी पश्चिमो मूर्धा अव्यक्ता चोर्ध्वमाननम्॥ १०२॥

शान्तिः स्यात् पूर्ववदनम् विद्या स्याद्दक्षिणाननम्।
प्रतिष्ठा चोत्तरास्यं स्यान्निवृत्तिः पश्चिमाननम्॥ १०३॥

तमा भवेत्तु हृदयं मोहाख्या च गळो भवेत्।
क्षया च दक्षिणांसः स्यान्निष्ठा वामांस एव च॥ १०४॥

मृत्युनाभिश्च मायाख्या जठरश्च जया भवेत्।
पृष्ठं स्याच्च जरा वक्षो रजा गुह्यञ्च साधनम्॥ १०५॥

रक्षा रतिः स्याद्दक्षोरुः पाल्या वामोरुमेव च।
कामाख्या दक्षजानुः स्याद् जानु संयमनीतरम्॥ १०६॥

क्रिया च दक्षजंघा स्याद् बुद्धिः स्याद्वामजङ्घिका।
कार्या स्याद्दक्षिणस्फिक् च धात्री वामस्फिगेव च॥ १०७॥

107c–08d. कार्या स्याद्° … दक्षिणः पदः] P_1M_1, *Kriyā*; *om.* T_1

---

102 c. मूर्धा] P_1T_1; मूर्ध्वाहि M_1 102 d. अव्यक्ता चोर्ध्व°] *conj.*; अव्यक्ताख्योर्ध्व M_1, *Kriyā*; अव्यक्ताचोर्ध° P_1T_1 103 c. चोत्तरास्यं स्यात्] *Kriyā*; चोत्तरासं स्यात् M_1; चोत्तरांस्यान् P_1; चोत्तरांशस्यात् T_1 103 d. पश्चिमाननम्] M_1P_1, *Kriyā*; पश्चिमानम् T_1 (unmetrical) 104 a. हृदयं] M_1P_1, *Kriyā*; हृदये T_1 104 b. मोहाख्या] P_1, *Kriyā*; मोहा च M_1; माहाख्या T_1 104 b. गळो°] $M_1P_1T_1$; गळं *Kriyā* 104 c. क्षया] P_1T_1; रक्षा M_1 104 d. निष्ठा वामांस एव च] P_1, *Kriyā*; इष्ठा वामांस एव च M_1; निद्रामावासयेद्वचः T_1 105 c. मृत्यु°] P_1T_1; मृत्युं° M_1 105 a. °मायाख्या] M_1P_1, *Kriyā*; मायाख्यं T_1 105 b. जया भवेत्] P_1; भवेज्ञया M_1, *Kriyā*; भवेज्ञयं T_1 105 c. पृष्ठं स्याच्च जरा] M_1, *Kriyā*; पृष्ठं—च्च ज्वरा P_1; पृष्ठं स्याश्च ज्वरा T_1 105 d. वक्षो रजा गुह्यञ्च] P_1, *Kriyā*; वक्षो रजा गुह्यश्च M_1; वक्ष्येराजगुह्यञ्च T_1 106 a. रक्षा रतिः] P_1, *Kriyā*; रक्षोरतिः M_1; रक्षा रभिः T_1 106 a. °दक्षोरुः] M_1P_1, *Kriyā*; °दक्षोरु T_1 106 b. °मेव च] P_1T_1; एव च M_1; °रेव च *Kriyā* 106 c. दक्षजानुः स्याद्] P_1, *Kriyā*; दक्षजा जानु T_1 106 d. जानु संयमनीतरम्] P_1T_1; जागुस्संयमनीतरम् M_1; जानुसंयमनी तरः *Kriyā* 107 a. च दक्ष°] P_1, *Kriyā*; दक्षिण° M_1T_1 107 c. °स्फिक् च] P_1; °स्फिक् M_1

कटिर्भवेत् ब्राह्मणी स्यात् दक्षपार्श्वश्च मोहिनी।
भवाख्या वामपार्श्वः स्यात् सिद्धिः स्याद्दक्षिणः पदः॥ १०८॥

ऋद्धिः स्याद्वामपादश्च द्युतिः स्याद्दक्षिणः करः।
लक्ष्मी स्याद्वामहस्तश्च मेधा वै नासिका भवेत्॥ १०९॥

कान्तिर्भवेच्छिरश्चैव दक्षबाहुः स्वधा भवेत्।
धृतिः स्याद्वामबाहुश्च एवं स्याच्छाक्तविग्रहः। ११०॥

[सकलविग्रहभावना]

शाक्तेनानेन सकळो विज्ञेयो निष्कलः शिवः।
शान्त्यतीतकला मूर्धा शान्तिर्वक्त्रसरोरुहम्॥ १११॥

विद्या विततवक्षोंसः प्रतिष्ठा गुह्यमण्डलम्।
निवृत्तिर्जानुजङ्घाङ्घ्रिः भुवनाध्वा तनूरुहम्॥ ११२॥

वर्णत्वङ्मन्त्ररुधिरं पदमांससिराचितम्।
तत्त्वास्थिमज्जाशुक्लादिधातुं सङ्गोगमोक्षदम्॥ ११३॥

111c–14b. शान्त्यतीतकला ··· व्यापिनं सर्वदा शिवम् *Kriyākramadyotikā*, p. 225.

111c–14. °शान्त्यतीत° ··· निष्कळश्शिवः] P_1; *om.* M_1T_1

---

108 a. °स्यात्] P_1; च M_1, *Kriyā* 108 b. °पार्श्वश्च] P_1; °पार्श्वस्तु M_1 108 c. भवाख्या] *Kriyā*; भयाख्या M_1P_1 108 cd. पार्श्वः स्यात् सिद्धिः स्याद्दक्षिणः पदः] *Kriyā*; पार्श्वस्यात् सिद्धिस्याद्दक्षिणघ्रिकः M_1; —P_1 109 a. °पादश्च] M_1P_1, *Kriyā*; °पार्श्वस्य T_1 109 b. °दक्षिणः करः] M_1, *Kriyā*; दक्षि—P_1; दक्षिणाङ्घ्रिकः T_1 109 c. °हस्तश्च] M_1P_1, *Kriyā*; °पादश्च T_1 109 d. मेधा वै] P_1, *Kriyā*; मेधाख्या M_1T_1 110 c. °बाहुश्च] P_1T_1; °बाहुस्यात् M_1 110 d. °च्छाक्त°] M_1P_1, *Kriyā*; °शक्ति° T_1 111 a. शाक्तेनानेन°] *Kriyā*; शाक्तानानेन M_1; शाक्तेनाने P_1; शक्तेनानेन T_1 111 . d. शान्तिर्वक्त्र°] P_1; शान्तिवक्त्र° *Kriyā* 112 a. °वक्षोंसः] P_1; °वक्षोंगं *Kriyā* 112 c. निवृत्तिर्जानु°] P_1; निवृत्तिजानु° *Kriyā* 112 d. भुवनाध्वा] P_1; भुवनाध्व *Kriyā* 113 a. °त्वङ्मन्त्र°] *Kriyā*; °त्वं मन्त्र° P_1 113 d. °धातुं] *Kriyā*; °धातु P_1

शिवान्ततत्त्वगर्भाध्वव्यापिनं सर्वदा शिवम्।
इतिं भावनया ज्ञेयः सकलो निष्कलः शिवः॥ ११४॥

[सदाशिवस्य ध्यानम्]

क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासनस्थितम्।
शुद्धस्फटिकसंकाशं द्वात्रिंशल्लक्षणान्वितम्॥ ११५॥

पद्मासनस्थं पञ्चास्यं प्रतिवक्त्रं त्रिलोचनम्।
दृक्क्रियेच्छाविशालाक्षं ज्ञानचन्द्रकलान्वितम्॥ ११६॥

धवलेशानवदनं पीतं तत्पुरुषाननम्।
कृष्णाघोरमुखोपेतं रक्ताभोत्तरवक्त्रकम्॥ ११७॥

सुश्वेतं पश्चिमास्येकं सद्योजातं सुमूर्तिकम्।
नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम्॥ ११८॥

शक्त्यभीशूलखट्वाङ्गवरव्यग्रकराम्बुजम्।
दक्षिणतोऽथ वामस्थैः डमरुं बीजपूरकम्॥ ११९॥

नागाक्षसूत्रं नीलाब्जं बिभ्राणं पञ्चभिः करैः।

115–21b. क्षित्यादिकुटिलाप्रान्त … वरं चाभयमेव च *Kriyākramadyotikā*, p. 98-99.

119–20b. शक्त्यसीशूलखट्वाङ्ग … बिभ्राणं पञ्चभिः करैः P_1M_1; *om.* T_1(eyeskip)

---

115 a. °प्रान्त°] M_1P_1, *Kriyā*; °प्रान्तं T_1, *ĀPūPa* 117 b. पीतं] M_1T_1; पीनं P_1; पीत° *Kriyā* 117 b. तत्पुरुषाननम्] P_1T_1; पुरुषान्वितम् M_1 118 a. सुश्वेतं पश्चिमास्येकं] P_1T_1; श्वेताभं पश्चिमास्येकं M_1; सुश्वेतपश्चिमास्येक° *Kriyā* 118 b. सुमूर्तिकम्] P_1; समूर्तकम् T_1; समूर्तिकम् M_1, *Kriyā*; प्रकीर्तितम् *ĀPūPa* 119 a. शक्त्यभी°] P_1; शक्त्यासी° M_1 119 a. °खट्वांगवर] *Kriyā*; °खट्वांगं वर P_1; खट्वांग वरा M_1 119 c. दक्षिणतोऽथ] *conj.*; दक्षिणेतोथ P_1M_1, *Kriyā* 119 d. डमरुं] P_1; डमरुः M_1 120 a. °सूत्रं] M_1P_1, *Kriyā*; सूत्रे *ĀPūPa*

खड्गखेटधनुर्बाणखट्वाङ्गनृकपालकम्॥ १२०॥

कुण्डिकामक्षमालां च वरं चाभयमेव च।
बिभ्राणं दक्षिणे वामे पाणिभिः परमेश्वरम्॥ १२१॥

दक्षिणे परशुं खड्गं शूलं वज्रं भयापहम्।
वामभागेऽनलं घण्टां नागं पाशं तथाङ्कुशम्॥ १२२॥

वह्निः संहारिणी शक्तिः पाशानां भस्मसात्करी।
प्रकाशिका पदार्थानां महामायोर्ध्ववर्तिनाम्॥ १२३ ॥

नागोऽप्रधृष्यताशक्तिः सर्वेषाञ्च विदारिका।
पाशं पाशत्रयं विद्यात् मायाकर्ममलाह्वयम्॥ १२४॥

घण्टा नादात्मकं रूपं मन्त्रविग्रहशोधकम्।
अभयं सर्वलोकानां शक्तिर्वै परिपालिनी॥ १२५॥

यद्भोग्ये ह्यात्मनः प्राप्तिस्तत्रैव नियमोऽङ्कुशम्।

---

122. दक्षिणे परशुं खड्गं ··· नागं पाशं तथाङ्कुशम् *Kriyākramadyotikā*, p. 99.

---

120 d. खट्वांगनृ°] P_1; खट्वांगऽ सृक् T_1; खट्वांगं नृ *Kriya* 120 d. °बाण°] P_1T_1; °त्राण° M_1 121 b. वरं चाभय°] M_1P_1, *Kriyā*; वरदाभय° T_1 122 a. दक्षिणे] P_1, *Kriyā*; अथवा दक्षिणे M_1T_1 122 b. शूलं वज्रं भयापहम्] P_1; त्रिशूलं वज्रपावकं M_1; शूलं वज्रं च पावकम् T_1, *Kriya* 122 c. °भागेऽनलं] P_1; °भागेभयं M_1T_1, *Kriya* 122 c. घण्टां] M_1, *Kriyā*; घण्टा P_1T_1 123 ab. °शक्तिः पाशानां] M_1P_1; शक्तिपाशानं T_1 123 c. पदार्थानां] P_1T_1; पदस्थानां M_1 124 a. नागोऽप्रधृष्यता°] *conj.*; नागोपह्ब्यता° M_1T_1; नागोपह्ब्यतां P_1 124 b. सर्वेषाञ्च विदारिका] P_1; सर्वेषाञ्चविदारिकाः M_1; सर्वेषाञ्चलिदारिका T_1 124 c. पाशं पाश°] M_1T_1; —P_1 124 d. °मलाह्वयम्] T_1; °मलाबयम् M_1; —P_1 125 a. घण्टा नादात्मकं] M_1; वर्णानादात्मकं P_1; वर्णानात्मकरं T_1 125 b. °शोधकम्] M_1P_1; शोधनम् T_1 125 c. °लोकानां] M_1P_1; °लोकेशं T_1 125 d. परिपालिनी] M_1P_1; परिपालिनम् T_1 126 a. यद्°] M_1T_1; सत्° P_1 126 a. °नः] P_1; °न° M_1T_1

एवंभूतस्वरूपाणि रूप्यन्ते चायुधात्मभिः ॥ १२६ ॥

आयुधैर्हस्तबृन्दानि बिभ्राणं परमेश्वरम् ।
सञ्चिन्त्य मूर्तेरुपरि शक्तिमात्रविजृम्भणम् ॥ १२७ ॥

लिंगाकारोपमर्देन भावने लिंगतां त्यजेत् ।
एवं विद्यात्मकं देहं लिङ्गारोहे तु संस्मरेत् ॥ १२८ ॥

[ईशानः]

नेत्रञ्च साभिधेयञ्च मूलवेष्टावकुण्ठनम् ।
स्फटिकाभञ्जगद्धेतु त्रिणेत्रञ्चन्द्रमौलिनम् ॥ १२९ ॥

सौम्यं प्रसन्नमीशानं त्रिशूलाभयपाणिनम् ।

[तत्पुरुषः]

पीताम्बरोपवीतञ्च नरं कनकसन्निभम् ॥ १३० ॥

मातुळुंगाक्षसूत्रे च दधानं चन्द्रमौलिनम् ।

[अघोरः]

त्रयक्षं मौलीन्दुभृत्सौम्यं कुण्डलालङ्कृतं ततः ॥ १३१ ॥

बभ्रुभ्रूश्मश्रुकेशञ्च दंष्ट्रालं विकृताननम् ।
कपालमालाभरणं सर्पवृश्चिकभूषणम् ॥ १३२ ॥

127–28b. आयुधैर्हस्तवृन्दानि ... भावने लिंगतां त्यजेत् *Kriyākramadyotikā*, p. 99.
129c–37b. स्फटिकाभञ्जगद्धेतु ... वरदाभयपाणिनम् *Kriyākramadyotikā*, p. 107-108.

---

127 a. आयुधैर्] T_1; आयुधे॰ M_1P_1 127 a. ॰वृन्दानि] P_1T_1; ॰प्रदानि M_1 (unmetrical) 128 c. देहं] M_1P_1; ह्येवं T_1 128 d. ॰रोहे] M_1P_1; ॰रोह॰ T_1 129 b. मूलवेष्टाव॰] M_1P_1; मूले येष्टाव॰ T_1 130 b. ॰शूलाभयपाणिनम्] M_1P_1; ॰शूलादयपाणिकम् T_1, *Kriyā* 130 d. नरं कनक॰] P_1T_1; नरकन्नरक M_1 131 d. ततः] P_1, *Kriyā*; तथा M_1T_1 132 b. दंष्ट्रालं] T_1; दंष्ट्रालु M_1; दंष्ट्रालुं P_1, *Kriyā* 132 b. विकृताननम्] P_1T_1; विकटाननम् M_1

खट्वाङ्गञ्च कपालञ्च खेटकं पाशमेव च।
वामहस्तचतुष्के तु दक्षहस्तचतुष्टये॥ १३३॥
त्रिशूलं परशुं खड्गं दण्डं चैवारिमर्दनम्।
ध्यायेन्नवांबुदाभासं अघोरं सर्वकामदम्॥ १३४॥

[वामदेवः]

वामं रक्तं सुरक्ताभमाल्यवस्त्रोपवीतिनम्।
तुङ्गनासारुणोष्णीषं खड्गखेटकपाणिनम्॥ १३५॥

[सद्योजातः]

सितस्रग्गन्धभूषाढ्यं सितोष्णीषं सिताम्बरम्।
सौम्यं मौलीन्दुसंपन्नं बालाकारं त्रिलोचनम्॥ १३६॥
सद्योजातं सितं ध्यायेद् वरदाभयपाणिनम्।

[वक्त्राणां ध्यानान्तरम्]

यद्वेशानादिकान् पञ्च सस्मितान् सौम्यदर्शनान्॥ १३७॥
कान्ताकृतीन्वसुकरान् दिशिवक्त्रान् सर्वभूषणान्।
वामैर्नागाक्षसूत्रे च नीलाब्जं बीजपूरकम्॥ १३८॥

138c–39. वामैर्नागाक्षसूत्रे ··· दृक्क्रियेच्छात्मकं विभोः *Kriyākramadyotikā*, p. 108.

---

133 c. °हस्तचतुष्के तु°] M_1P_1, *Kriyā*; °हस्ते चतुष्केषु T_1 133 d. दक्षहस्तचतुष्टये] M_1P_1, *Kriyā*; दण्डहस्ते चतुष्टयम् T_1 134 c. ध्यायेन्नवांबुदाभासं] P_1T_1; ध्यायेन्नवांबुदाभायं M_1; एवं नवाम्बुदाभासं *Kriyā* 135 a. वामं रक्तं सुरक्ताभ°] M_1P_1, *Kriyā*; वामहस्तैसुरक्ताभा° T_1 135 d. °पाणिनम्] $M_1P_1T_1$; °पाणिकम् *Kriyā* 136 a. सितस्रग्गन्धभूषाढ्यं] P_1T_1; सितसृक्गभुष्टाढ्यं M_1 136 b. सितोष्णीषं सिताम्बरम्] M_1P_1, *Kriyā*; सितोष्णीषसिताम्बरः T_1 137 a. सितं ध्यायेत्] P_1; सितास्यैकम् M_1T_1; स्मितास्यैकम् *Kriyā* 137 b. °पाणिनम्] $M_1P_1T_1$; °पाणिकम् *Kriyā* 137 c. यद्वेशा°] M_1P_1; यद्वैशा° T_1 138 a. वसु°] M_1T_1; ससु° P_1 138 b. दिशिवक्त्रान्] T_1; दिश्वत्रान् M_1; दिव्यास्त्रान् P_1 138 c. वामैर्] P_1; *Kriyā*; यद्वा वामैर् M_1; वामे T_1

शूलाभयधरान् शक्तिं सव्यैर्धारयतः करैः।

[अङ्गमन्त्राणां ध्यानानि]

अरुणाभं स्मरन्नेत्रं दृक्रियेच्छात्मकं विभोः॥ १३९॥

त्रितत्त्वरूपवह्न्यादिमण्डलत्रितयाश्रितम्।
हृदाद्यङ्गोक्तवदनं करधार्यादिसंयुतम्॥ १४०॥

एकास्यं वा त्रिशूलाहिहस्तं योगशिवोक्तितः।
हृदयं चन्द्रसंकाशं शिरस्स्वामीकरप्रभम्॥ १४१॥

शिखां सिन्धूरवर्णाढ्यां कवचं भृंगभास्वरम्।
पद्मासनस्थानर्धेन्दुजटामकुटधारिणः॥ १४२॥

त्रिलोचनांश्चतुर्बाहून् सर्वाभरणभूषितान्।
शिवस्याभिमुखान् शक्तिशूलाभयवरान्वितान्॥ १४३॥

चतुर्वक्त्रान् अथास्त्रञ्च दंष्ट्रिणं पिङ्गलद्युतिम्।

142–45b. शिखां सिन्धूरवर्णाढ्यां … निध्यायेत् साधकोत्तमः *Kriyākramadyotikā*, p. 109.

143cd. शिवस्या° … °वरान्वितान्] P_1, *Kriyā*; *om.* M_1T_1(eyeskip)

---

139 a. °धरान्] P_1; °वरान् M_1T_1, *Kriyā* **139 a.** शक्तिं] M_1, *Kriyā*; शक्ति° P_1T_1 **139 b.** सव्यैर्धारयतः] P_1, *Kriyā*; सव्यैश्च दधतं M_1; सर्वैर्धारयतः T_1 **140 a.** त्रितत्त्वरूपवह्न्यादि°] T_1; त्रितत्त्वरूपावह्न्यादि M_1; आदित्यरूपं वह्न्यादि° P_1 **140 b.** °मण्डल°] M_1T_1; °म—ल° P_1 **140 b.** °याश्रितम्] P_1; °याश्रियम् M_1T_1 **140 c.** °वदनं] M_1P_1; वदना° T_1 **141 a.** °त्रिशूलाहि] P_1T_1; °त्रिशूलाग्नि M_1 **141 b.** °हस्तं योगशिवोक्तितः] P_1; हसं येनशिवेक्तितः M_1; हस्तयोगविधोस्थितः T_1 **141 d.** शिरस्स्वामीकर°] *conj.*; शिवस्वामीकर° M_1; शिरस्वामीकर° P_1T_1 **142 b.** °वर्णाढ्यां] M_1P_1, *Kriyā*; °वर्णाढ्यं T_1 **142 d.** °धारिणः] M_1P_1, *Kriyā*; °धारणं T_1 **143 b.** त्रिलोचनांश्चतु°] P_1, *Kriyā*; त्रिणेत्रांश्च चतु° M_1; त्रिलोचनश्चतु° T_1 **144 b.** °द्युतिम्] P_1, *Kriyā*; °प्रभम् M_1; द्दितिम् T_1

द्विभुजानेकवक्त्रान्वा वरदानभयप्रदान्॥ १४४ ॥
शूलाभयधरान्वापि निध्यायेत् साधकोत्तमः।

[अङ्गानां स्वरूपाणि]

हृदयं तस्य चिच्छक्तिः शिरश्चैश्वर्यमष्टधा॥ १४५ ॥

नान्याधीनं वशित्वं च यत् शिखोपरिवर्तिनी।
अभेद्यं परमेशस्य तेजः कवचमुच्यते॥ १४६ ॥

प्रतापो दुस्सहश्चास्त्रमन्तरायापहारकम्।
नमस्स्वधा च स्वाहा च वौषट् चेति यथाक्रमम्॥ १४७ ॥

सर्वज्ञत्वञ्च तृप्ति स्यादनादिज्ञानमीशिता।
अलुप्तानन्तशक्ती द्वे षडस्तित्वादधश्च षट्॥ १४८ ॥

सर्वज्ञता तृप्तिरनादिबोधः
स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च निरामयात्मा
विशुद्धदेहश्च गुणास्तथादौ॥ १४९ ॥

अस्तित्वमधिकत्वञ्च स्वतन्त्रं सर्वगोप्तृता।

145c–47. हृदयं तस्य चिच्छक्तिः ... चेति यथाक्रमम् *Somaśambhupaddhati*, verses 1.3.72c–74.

145c–50. हृदयं तस्य चिच्छक्तिः ... षडंगानां गुणाः क्रमात् P_1; *om.* M_1T_1

---

144 c. द्विभुजानेक॰] P_1, *Kriyā*; द्यनेक M_1 (unmetrical); हृदाद्यानेक॰ T_1 **145 a.** शूलाभयधरान्] P_1, *Kriyā*; त्रिशूलाब्जधरान् M_1T_1 **145 b.** निध्यायेत् साधकोत्तमः] *Kriyā*; मानस्त्वैं विभावयेत् M_1; ध्याययेत् साधकोत्तमः P_1; मानसैवं विभावयेत् T_1 **146 b.** यत् शिखोपरिवर्तिनी] *Soma*; यः शिखोपरवर्तिनी P_1 **147 cd.** स्वधा च स्वाहा च वौषट् चेति यथाक्रमम्] *Soma*; नमस्व —P_1

सर्वज्ञत्वमधृष्यत्वं षडंगानां गुणाः क्रमात्॥ १५०॥

[अङ्गानां ध्यानान्तरम्]

यथेशाद्याः सितस्वर्णकृष्णरक्तेन्दुसन्निभाः।
चन्द्रपीतारुणाळ्यग्निसमभा हृदयादयः॥ १५१॥
पञ्चवक्त्रा दशभुजाः शूलाभीत्यसिसायकान्
रुद्राक्षं दक्षिणे वामे कुण्डिकाचापटंककान्॥ १५२॥
वराब्जैश्च वहन्तश्च प्रतिवक्त्रं त्रिलोचनान्।
द्विरष्टवत्सराकारान् सर्वाभरणभूषितान्॥ १५३॥
तत्रास्त्रं भीषणाकारं वृत्ताक्षं दंष्ट्रयान्वितम्।

[द्वितीयावरणम् (विद्येश्वराः)]

द्वितीयावरणे प्रोक्ता अष्ट विद्येश्वरा मताः॥ १५४॥
विद्येश्वराश्चतुर्वक्त्रा हरवद्दशबाहवः।
खण्डेन्दुमौलयः सर्वे पद्मस्था विविधायुधाः॥ १५५॥

155–58. Cf. विद्येश्वराश्चतुर्वक्त्रा ... चन्द्ररेखाजटान्विताः *Kriyākramadyotikā*, p. 226.

152c–53. रुद्राक्षं दक्षिणे वामे ... सर्वाभरणभूषितान् P_1; *om.* T_1
154cd. द्वितीयावरणे ... विद्येश्वरा मताः] P_1; *om.* M_1T_1

---

151 a. यथेशाद्याः सितस्वर्ण॰ *conj.*; विद्येशाद्यास्सितावर्णाः M_1; यद्येशाद्याः सितस्वर्ण॰ P_1; यद्येशाद्यास्थितं वर्णं T_1 151 b. ॰सन्निभाः] M_1; ॰सन्निभा P_1T_1 151 d. ॰समभा] P_1; ॰सन्निभा M_1; ॰समया T_1 152 a. पञ्चवक्त्रा दशभुजाः] P_1T_1; पञ्चवक्त्रन्दशभुजं M_1 152 b. ॰शूलाभीत्यसिसायकान्] *conj.*; शूलाभीत्यसिसायकम् M_1; ॰शूलाहीत्यसिसायकान् P_1; ॰शूलशक्तिहिसायकान् T_1 152 c. रुद्राक्षं] P_1; रुद्राक्ष॰ M_1 152 d. कुण्डिका॰] M_1; कुण्डिकां P_1 153 b. प्रतिवक्त्रं त्रिलोचनान्] P_1; प्रतिवक्त्रत्रिलोचनं M_1 153 c. ॰वत्सराकारान्] P_1; ॰वत्सराकारम् M_1 154 a. तत्रास्त्रं] P_1; क्त्रास्यं M_1; तत्रास्त्रान् T_1 154 b. वृत्ताक्षं] M_1; पृक्ताक्षं P_1T_1 155 b. हरवद्दशवाहवः] M_1P_1, *Kriyā*; हरवादशवाहवा T_1 155 d. पद्मस्था॰] M_1P_1, *Kriyā*; पद्मास्था॰ T_1

खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः ।
वराभयकरोपेताः शूलपङ्कजपाणयः॥ १५६ ॥
हेमाग्निनीलभृंगेन्दुहिमरक्तसिताः क्रमात् ।

यद्वा—

विद्येश्वराः ककुब्वर्णाः प्रबद्धाञ्जलिपाणयः॥ १५७ ॥
एकानना जटायुक्ता ध्येयाः पूर्वादिषु क्रमात् ।
त्र्यक्षाश्च शक्तिशूलाढ्याः चन्द्ररेखावतंसकाः॥ १५८ ॥

[तृतीयावरणम् (गणाः)]

तृतीयावरणे ध्येया नन्द्यादिगणपाष्टकाः ।
रक्तो नन्दी चतुर्बाहुरेकवक्त्रस्त्रिदृग्जटी॥ १५९ ॥
साक्षसूत्रस्त्रिशूली च वराभयकरान्वितः ।
त्रिनेत्रः पीनकृष्णाङ्गो बभ्रुश्मश्रुशिरोरुहः॥ १६० ॥

159c–70b. रक्तो नन्दी चतुर्बाहुर्° … वृषभः केवलस्थितः *Kriyākramadyotikā*, p. 226-27.

159ab. तृतीयावरणे … °पाष्टकाः] P_1; *om.* M_1T_1
159c–60c. रक्तोनन्दी … त्रिनेत्रः पीनकृष्णाङ्गो] P_1T_1; *om.* M_1

---

156 b. °सूत्रिणः] M_1P_1, *Kriyā*; °सूत्रिणा T_1 **156 c.** वराभय°] M_1P_1, *Kriyā*; वज्राभय° T_1 **157 a.** °भृंगेन्दु] P_1T_1; °भृंगेन्दुं M_1 **157 b.** °हिमरक्तसिताः] P_1T_1; °हिमरक्तास्सिता° M_1 **157** यद्वा] M_1; *om.* P_1T_1 **157 c.** विद्येश्वराः] P_1T_1; विद्येश्वराम् M_1 **158 ab.** एकानना जटायुक्ता ध्येयाः] M_1P_1; एकानना जटा-युक्ता ध्येया T_1, *Kriyā* **158 c.** त्र्यक्षाश्च शक्तिशूलाढ्याः] *Kriyā*; त्र्ययक्षाश्शक्तिशूला-ढ्या° M_1; त्रियक्षाः शक्तिशूलास्या° P_1; त्र्यक्षाश्शक्तिशूलास्य° T_1 **158 d.** °वतंसकाः] M_1P_1; °वतंसकः T_1; °जटान्विताः *Kriyā* **159 a.** तृतीया°] *em.*; त्रितीया° P_1 **159 c.** °चतुर्] P_1, *Kriyā*; *om.* T_1 (unmetrical) **160 a.** °स्त्रिशूली] P_1, *Kriyā*; °स्त्रिशू° T_1 (unmetrical) **160 b.** °करान्वितः] P_1, *Kriyā*; °करान्विताः T_1 **160 c.** त्रिनेत्रः पीन°] P_1, *Kriyā*; त्रिनेत्रो पीत° T_1; *om.* M_1 **160 cd.** कृष्णाङ्गो बभ्रुश्मश्रुशिरोरुहः] *Kriyā*; भ्रूश्मश्रुशिरोरुहः M_1; कृष्णा —P_1; कृष्णाङ्गो बभ्रूश्मुशिरो-रुहः T_1

मुण्डखड्गौ खेटशूले महाकालो वहन् करैः।
निर्मांसविग्रहो भृंगी श्वेतो दण्डाक्षसूत्रधृक्॥ १६१॥

नृत्यंस्त्रिणेत्रः सशिखो देवालोकनतत्परः।
त्रिनेत्रो वामनाकारो गजवक्त्रो महोदरः॥ १६२॥

पाशाङ्कुशौ स्वदन्तञ्च पक्वमाम्रफलं वहन्।
शुण्डावामकराभ्याञ्च रक्ताङ्गो विघ्ननायकः॥ १६३॥

वृषो वृषाकृतिस्त्र्यक्षो रुद्रैकगतमानसः।
साक्षाद्धर्मस्वरूपश्च शुद्धस्फटिकनिर्मलः॥ १६४॥

आधारभूतो विज्ञेयस्तीक्ष्णशृङ्गो महाबलः।
चतुर्भुजो बालवेषः स्कन्दः कनकसप्रभः॥ १६५॥

शक्तिकुक्कुटहस्तश्च वराभयकरान्वितः।
सिंहोपरि स्थिता देवी शूलादर्शकरद्वया॥ १६६॥

करण्डमकुटा पीता मुक्तादिभिरलङ्कृता।
चण्डेश्वरश्चतुर्बाहुः चतुर्वक्त्रस्त्रिलोचनः॥ १६७॥

बिभ्रत्कमण्डलुं शूलमक्षसूत्रं परश्वधम्।

---

161 a. मुण्डखड्गौ खेटशूले] *Kriyā*; दण्डखड्गौ खेटशूलौ M_1; —॰टशूले P_1; मुण्डखड्गौ खेटशूलौ T_1 **161 c.** निर्मांसविग्रहो] M_1T_1, *Kriyā*; —ग्रहो P_1 **161 d.** ॰धृक्] T_1, *Kriyā*; ॰भृत् M_1P_1 **162 a.** नृत्यंस्॰] *Kriyā*; नृत्यत् M_1; नृत्य॰ P_1T_1 **163 d.** रक्ताङ्गो] M_1P_1, *Kriyā*; रक्ताभो T_1 **165 d.** ॰सप्रभः] T_1; ॰सुप्रभः M_1, *Kriyā*; ॰सन्निभः P_1 **166 a.** ॰हस्तश्च] M_1P_1, *Kriyā*; ॰हस्ताश्च T_1 **166 b.** ॰करान्वितः] $M_1P_1T_1$; ॰समन्वितः *Kriyā* **166 c.** देवी] P_1; पीता M_1, *Kriyā*; पीत॰ T_1 **166 d.** शूलादर्शकरद्वया] P_1, *Kriyā*; शूलाभयकरद्वया M_1; शूलादर्शकरद्वयः T_1 **167 a.** पीता] P_1; देवी M_1T_1, *Kriyā* **167 b.** ॰कृता] M_1T_1, *Kriyā*; ॰क —P_1 **168 b.** परश्वधम्] *em.*; परश्वथम् $M_1P_1T_1$, *Kriyā*

महोरगोपवीताढ्यस्तन्निर्वर्तितकंकणः॥ १६८॥

ध्येयो नवाम्बुदाभासः समयादिनियामकः।
विमानस्था गणास्तेषां मूषिकस्थो गजाननः॥ १६९॥

मयूरवाहनः स्कन्दो वृषभः केवलस्थितः।

[चतुर्थावरणम् (लोकपालाः)]

चतुर्थावरणे ध्येया इन्द्र«ादिदिक्प»संज्ञकाः ॥ १७०॥

ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम्।
सहस्रनयनं शक्रं वज्रपाणिं विभावयेत्॥ १७१॥

सप्तार्च्चिषञ्च बिभ्राणमक्षमालाकमण्डलुम्।
ज्वालामालाकुलं रक्तं शक्तिहस्तं छगासनम्॥ १७२॥

कृतान्तं महिषारूढं दण्डहस्तं भयानकम्।
कालपाशधरं कृष्णं ध्यायेद्दक्षिणदिक्पतिम्॥ १७३॥

रक्तनेत्रं शवारूढं नीलोत्पलदळप्रभम्।

171–81. ऐरावतगजारूढं ... गरुडासनसंस्थितः *Kriyākramadyotikā*, p. 227-28.

170cd. चतुर्थावरणे ... संज्ञकाः *om.* M_1P_1

---

168 d. °स्तन्निर्वर्तितकंकणः] *Kriyā*; °स्तन्निवृत्तितकंकणः M_1; —त कंकणः P_1; °स्त-न्निवर्तितकंकणः T_1 **169 c.** गणास्तेषां] $M_1P_1T_1$; गणास्त्वेषां *Kriyā* **170 a.** मयूर-वाहनः] T_1, *Kriyā*; मयूरवाहन M_1; —हन P_1 **170 ab.** °स्कन्दो वृषभः केवलस्थि-तः] M_1P_1, *Kriyā*; स्कन्दं वृषभं केवलस्थितं T_1 **170 c.** चतुर्था°] *conj.*; —र्था° P_1 **170 cd.** °वरणे ध्येया इन्द्रादिदिक्पसंज्ञकाः] *conj.*; °वरणे ध्येया इन्द्र — संज्ञकाः P_1 **171 b.** स्वर्णवर्णं किरीटिनम्] M_1T_1, *Kriyā*; स्व —रीटिनं P_1 **171 c.** शक्रं] $M_1P_1^c$, *Kriyā*; चक्रं $P_1^{ac}T_1$ **171 d.** वज्र°] M_1P_1, *Kriyā*; वज्रं T_1 **172 a.** °माला°] P_1; °मालां M_1, *Kriyā*; °सूत्र° T_1 **172 c.** °मालाकुलं] M_1T_1, *Kriyā*; —P_1 **172 d.** छगासनम्] P_1T_1; अजासनम् M_1

कृपाणपाणिमस्रौघं पिबन्तं राक्षसेश्वरम्॥ १७४॥

नागपाशधरं हृष्टं रक्तौघद्युतिविग्रहम्।
शशाङ्कधवळं ध्यायेद् वरुणं मकरासनम्॥ १७५॥

आपीनं हरितच्छायं विलोलध्वजधारिणम्।
प्राणभूतञ्च भूतानां हरिणस्थं समीरणम्॥ १७६॥

कुबेरं मनुजासीनं सगर्वं खर्वविग्रहम्।
स्वर्णच्छायं गदाहस्तमुत्तराशापतिं स्मरेत्॥ १७७॥

ईशानं वृषभारूढं त्रिशूलव्यालधारिणम्।
शरच्चन्द्रावदातं च चन्द्रमौलिं त्रिलोचनम्॥ १७८॥

पीनं पीतं चतुर्बाहुं ब्रह्माणं चतुराननम्।
हंसयानं च बिभ्राणं दण्डाक्षस्रुक्कमण्डलुम्॥ १७९॥

अनन्तं पुण्डरीकाक्षं फणादशशतीयुतम्।
विद्युद्दामप्रतीकाशं कूर्मारूढं कृताञ्जलिम्॥ १८०॥

विष्णुश्चतुर्भुजो माली शंखचक्रगदाब्जधृक्।
नीलाम्बुदप्रतीकाशो गरुडासनसंस्थितः॥ १८१॥

[पञ्चमावरणम् (लोकपालास्त्राणि)]

---

180. अनन्तं पुण्डरीकाक्षं... कूर्मारूढं कृताञ्जलिम्] P_1T_1; *om.* M_1

---

174 c. अस्रौघं] M_1T_1, *Kriyā*; आस्रौघं P_1 175 ab. हृष्टं रक्तौघ°] P_1T_1; सृष्टं मु-
क्तौघ° M_1 175 c. °धवळं] M_1P_1, *Kriyā*; °वदनं T_1 177 b. सगर्वं खर°] P_1T_1;
सर्वगं खट्ग° M_1 177 c. स्वर्णच्छायं] $M_1P_1T_1$; रक्तच्छायं *Kriyā* 178 b. त्रिशू-
ल°] M_1T_1; त्रिशूलं P_1, *Kriyā* 178 c. शर्च्चन्द्रावदातं च] P_1, *Kriyā*; शरच्चन्द्रव-
दाकारं M_1; चरच्चन्द्रावतारश्च T_1 179 a. पीनं पीतं] P_1; पीतं पीनं M_1T_1, *Kriyā*
180 a. °काक्षं] P_1, *Kriyā*; °काक्ष° T_1 180 b. °दशशतीयुतम्] P_1, *Kriyā*; °द-
शतीयुतम् T_1

पञ्चमावरणे प्रोक्ता वज्राद्यायुधनामकाः।
वज्रं स्यात्पुरुषः स्थूलः कर्कशोऽतिदृढो बली॥ १८२॥
शक्तिस्तु योषिदाकारा लोहिताङ्गी त्रिकोणगा।
दण्डोऽपि पुरुषः कृष्णवपुर्ल्लोहितलोचनः॥ १८३॥
खड्गं च पुरुषः श्यामशरीरः क्रुद्धलोचनः।
पाशः सप्तफणः सर्पः पुरुषः पुच्छसंयुतः॥ १८४॥
ध्वजस्तु पुरुषः पीतो व्यावृतास्यो महाभुजः।
गदा पीतप्रभा कन्या सुपीनजघनस्थला॥ १८५॥
त्रिशूलं पुरुषो दिव्यो नभःश्यामकळेबरः।
पद्मं च पुरुषो दिव्यः शुक्लाङ्गः शुभलोचनः॥ १८६॥
शतारचक्रभृन्मूर्ध्नि चक्रं श्यामतनुः पुमान्।
जाये शक्तिगदे ज्ञेये चक्रपद्मे नपुंसके॥ १८७॥
शेषाः पुमांसो विज्ञेयाः शिवेज्याविधितत्परैः।

182c–87b. वज्रं स्यात्पुरुषः ... श्यामतनुः पुमान् *Kriyākramadyotikā*, p. 229.

182c–87b. वज्रं स्यात्पुरुषः ... श्यामतनुः पुमान्। M_1P_1; From this line onwards T_1 writes only the first word of each line and adds a '+' mark. This might have been done by the scribe knowing that these verses are taken from the *Kriyākramadyotikā*.

---

182 ab. पञ्चमा° ...°नामकाः] P_1; *om.* M_1T_1 **182 d.** कर्कशोऽतिदृढो बली] P_1T_1; कर्मशोनिदृढो बली M_1 **183 b.** लोहिताङ्गी] *Kriyā*; लोहितांग्नि M_1; लोहितांग्रि° P_1; *om.* T_1 **184 a.** पुरुषः] *Kriyā*; पुरुष° M_1P_1 **184 c.** सप्तफणः सर्पः] P_1; सप्तफणोपेतः M_1 **185 cd.** °प्रभा कन्या सुपीन] M_1, *Kriyā*; °प्रभ — आपीन P_1 **186 c.** पद्मं च पुरुषो दिव्यः] M_1, *Kriyā*; पद्म — षो दिव्य P_1 **187 b.** चक्रं] M_1P_1; चक्र *Kriyā* **187 c.** जाये शक्तिगदे] M_1P_1; जयाशक्तिगते T_1 **187 d.** चक्रपद्मे] M_1P_1; पवित्रे T_1 **188 a.** शेषाः] M_1P_1; शेषं T_1 **188 b.** शिवेज्याविधितत्परैः] M_1; विज्ञेयाश्शिवेप्यविधतत्परैः° P_1 (unmetrical); विज्ञेयश्शिवेज्याविधितत्परे T_1 (unmetrical)

सर्वाण्यञ्जलिहस्तानि पद्मसंस्थानि पूर्वतः॥ १८८॥

वज्राद्यंकितशीर्षाणि भावयेत् पञ्चमावृतौ।

अव्यक्ते मुखलिंगे च विशेषः कश्चिदुच्यते॥ १८९॥

अनन्ताद्या दलाग्रेषु पीठकण्ठे गणेश्वराः।

पीठपादे तु लोकेशाः तदस्त्राणि शिलोपरि॥ १९०॥

पूज्यान्यावरणान्येवं स्वस्वव्याप्तिविभेदतः।

[गुरुपूजा]

श्रीमद्देशिकपादेभ्यः सशक्तिभ्यो नमो नमः॥ १९१॥

सदा पञ्चात्मचिद्व्यक्तिकारणेभ्यो नमो नमः।

[विद्यापीठस्थः ईश्वरः]

अशेषाज्ञानहं विश्वविज्ञानप्रदमीश्वरम्॥ १९२॥

विद्यापीठस्थमादृत्य मनोवाग्विग्रहैर्नुमः।

188c–89b. सर्वाण्यञ्जलिहस्तानि ... भावयेत् पञ्चमावृतौ *Kriyākramadyotikā*, p. 229.
190–91b. अनन्ताद्यादलाग्रेषु ... स्वस्वव्याप्तिविभेदतः *Kriyākramadyotikā*, p. 229.
191c–92b. श्रीमद्देशिकपादेभ्य॰ ... ॰कारणेभ्यो नमोनमः *Kriyākramadyotikā*, p. 119.
192c–93b. अशेषाज्ञानहं विश्व॰ ... मनोवाग्विग्रहैर्न्नुमः *Kriyākramadyotikā*, p. 120.

189ab. वज्राद्यंकित॰ ... पञ्चमावृतौ] M_1P_1; *om.* T_1
190c–91b. पीठपादे तु लोकेशाः ... स्वस्वव्याप्तिविभेदतः M_1P_1; *om.* T_1

---

188 c. सर्वाण्यञ्जलि॰ ... पूर्वतः] M_1P_1; सर्वाण्यञ्जलि —T_1 190 a. अनन्ताद्या ... गणेश्वराः] M_1P_1; अनन्ताद्यादळाग्रेषु —T_1 190 c. पीठपादे तु] P_1; पीठपादेषु M_1T_1 191 cd. श्रीमद्देशिकपादेभ्यः सशक्तिभ्यो नमो नमः] M_1P_1; श्रीमद्देशिकपादेभ्यो नमः T_1 192 a. पञ्चात्म॰] $M_1P_1T_1$; शिष्टात्म *Kriyā*   192 ab. ॰चिद्व्यक्तिकारणेभ्यो नमो नमः] P_1, *Kriyā*; ॰संवोधकारणेभ्यो नमो नमः M_1; ॰संवोधकारणेभ्यो नमः T_1 192 c. अशेषाज्ञानहं] $M_1P_1T_1$; सकलाज्ञानहं *Kriyā*   193 b. ॰र्नुमः] P_1T_1; ॰र्नमः M_1, *Kriyā*

[वागीश्वरीध्यानम्]

देवीमावाहयेद्विद्वान् विधिवद्विश्वमातरम्॥ १९३॥
श्यामामृतुमतीं ध्यात्वा सद्वासोमाल्यभूषणाम्।
प्रसन्नवदनां पद्मपत्राभनयनत्रयाम्॥ १९४॥
तद्वद्वागीश्वरीं तत्र संभूतं शिवपावकम्।

[ब्रह्माध्यानम्]

सितपद्मासनासीनं चतुर्वक्त्रं चतुर्भुजम्॥ १९५॥
लम्बकूर्चं ब्रह्ममूर्तिं जटामण्डितशेखरम्।
स्रुक्स्रुक्मण्डलुदण्डाक्षमालाव्यग्रकराम्बुजम्॥ १९६॥

यद्वा—

[शिवबलिभुजः]

स च रक्ततनुं त्र्यक्षं शिवायुधभुजान्वितम्।
तत्स्थं हविर्भोगपरं सदा सर्वेष्टदं शिवम्॥ १९७॥

193c–94. देवीमावाहयेद्विद्वान् ··· नयनत्रयाम् *Kriyākramadyotikā*, p. 124.

195c–97b. सितपद्मासनासीनां ··· शिवायुधभुजान्वितम् *Kriyākramadyotikā*, p. 238.

---

194. वागीशीं पुण्डरीकाभां चतुर्हस्तां घनस्तनीम्।
व्याख्यानपुस्तकाभ्यान्तु कमण्डल्वक्षधारिणीम्॥ M_1 adds this verse.

196–97b. लम्बकूर्चं ··· शिवायुधभुजान्वितम् M_1P_1; *om.* T_1

---

193 c. °विद्वान्] P_1T_1; विद्वाद्° M_1; विद्यां *Kriyā* **194 b.** सद्वासोमाल्यभूषणाम्] M_1, *Kriyā*; सद्वासोमाल्यभूषणम् P_1; सद्यस्सोमं विभूषणम् T_1 **195 a.** तद्वद्वागी-श्वरीं] *conj.*; तद्वद्वागीश्वरं M_1P_1; तत्तद्वागीश्वरी T_1 **195 b.** संभूतं] M_1T_1; संहृतं P_1 **195 cd.** सितपद्मा° ··· चतुर्भुजम्] M_1P_1, *Kriyā*; सितपद्मासनासीनं —T_1 **196 .** यद्वा] M_1, *Kriyā*; *om.* P_1T_1 **197 a.** सचरक्ततनुं] M_1, *Kriyā*; यद्वारक्ततनुं P_1 **197 b.** °भुजान्वितम्] P_1; °भुजान्वितः M_1, *Kriyā* **197 d.** सर्वेष्टदं] M_1P_1; सवेदं T_1 (unmetrical)

आश्रयाशानिभान् वन्दे बलिदेवान् यथोक्तवत्।

[चण्डेशध्यानम्]

रुद्राग्नेः प्रभवं चण्डं कज्जलाभं भयानकम्॥ १९८॥

शूलटङ्कधरं रौद्रं चतुर्वक्त्रं चतुर्भुजम्।
मुखोद्गीर्णमहाज्वालं रक्तद्वादशलोचनम्॥ १९९॥

जटामकुटखण्डेन्दुमण्डितं फणिकङ्कणम्।
व्याळयज्ञोपवीतं च साक्षसूत्रकमण्डलुम्॥ २००॥

श्वेतपद्मासनासीनं भक्तिप्रह्वार्तिनाशनम्।
एवमुक्तप्रकारेण सर्वानेतान् प्रभावयेत्॥ २०१॥

[फलश्रुतिः]

विदध्यात् प्रत्यहं पूजां दीक्षितोऽथ कृतोद्यमः।
यत्कृत्वाभिमतं सर्वं देहान्ते मुक्तिमाप्नुयात्॥ २०२॥

«ध्यानरत्नावली» ह्येषा सदा शिष्यहितैषिणी।

198c–201b. रुद्राग्नेः प्रभवञ्चण्डं ... भक्तिप्रह्वार्तिनाशनम् *Kriyākramadyotikā*, p. 131.

---

198. M_1 omits the following verses and ends here without any colophon.

---

198 a. °याशानिभान्] *conj.*; °याशानिभं M_1P_1; °याभानिशं T_1 198 b. बलि°] M_1T_1; वल° P_1 198 cd. रुद्राग्नेः प्रभवं चण्डं कज्जळाभं] P_1; रुद्रांशे प्रभवं चण्डं कज्जळानं T_1; रुद्राग्निप्रभवं चण्डं कज्जळाभं *Kriyā* 199 cd. मुखोद्गीर्णमहाज्वालं रक्तद्वादशलोचनम्] *Kriyā*; मुखोद्गीर्णमहाज्वालारक्तं द्वादशलोचनम् P_1; मुखोद्गीर्णे महोज्वालं रक्तद्वादशनेत्रकम् T_1 200 b. °मण्डितं] P_1, *Kriyā*; °मण्डिता T_1 201 c. °मुक्त°] P_1; °मुक्ति° T_1 201 d. प्रभावयेत्] T_1; °विवर्जयेत् P_1 202 ab. पूजां दीक्षितोऽथ कृतोद्यमः] *conj.*; पूजा दीक्षितोपिकृतोद्यमैः P_1; पूजा दिक्षितोऽथ कृतोद्यमः T_1 202 a. यत्कृत्वाभिमतं] *conj.*; यद्भुत्काभिमतं P_1; यत्कृत्वभिमदं T_1 202 a. मुक्तिमाप्नुयात्] T_1; —P_1 203 a. ध्यानरत्नावली ह्येषा सदा शिष्यहितैषिणी] *conj.*; —ह्येषा सदाशिष्यहितै —P_1; *om.* T_1

त्रिलोचनशिवेनैवं संगृहीता परिस्फुटम्॥ २०३॥

॥ इति त्रिलोचनशिवाचार्यविरचिताध्यानरत्नावली समाप्ता॥

चिदम्बरेश्वराय नमः॥ शिवकामसौन्दर्यै नमः॥

---

203. P_1 adds the following two verses at the end:

आर्यावर्तसमुद्भवो विनयवान् वाग्मी कुलीनो युवा
मेधावी कुशलः क्रियासु विषयेष्वन्धः शुचिर्धार्मिकः।
प्रत्युत्पन्नमतिश्शिवागमरतो दक्षस्तपस्वी सतां
मान्यो देवगुरुद्विजाग्निषु परो भक्तो भवेत्साधकः॥
गुरुत्वे वर्ज्यः—क्रूरोव्याविद्योव्यसनीकृतघ्नो डम्भः पुनर्भुगुरुभक्तिहीनः।
मात्सर्ययुक्तो विषयी क्रियासु वर्ज्यः प्रतिष्ठादिषु तार्किकश्च॥

203. P_1 adds the following scribal note regarding the date of this manuscript written:

हरः ओम्। प्रमाद्यक्ष वरुषम् वैशाखमासं २ तेति ध्यानरत्नावली एलुति निरैवेरिनतु।

---

203 a. °शिवेनैवं संगृहीता परिस्फुटम्] P_1; °शिवेनैव संश्रितं परिधिस्फुटं T_1 **203 a.** °विरचिताध्यानरत्नावली समाप्ता] P_1; विरचितायां ध्यानरत्नावली समाप्तः T_1

APPENDICES

॥ रौरवान्तर्गतशिवस्तोत्रम् ॥

सुराधिपं नमस्कृत्य शशाङ्ककृतशेखरम् ।
कपालमालिनं देवं प्रणतोऽस्मि सदाशिवम् ॥ १ ॥

कालेश्वरं महाकालं कालञ्जरनिवासिनम् ।
कालकृत्कालदातारं प्रणतोऽस्मि सदाशिवम् ॥ २ ॥

सर्वकृत्सर्ववेत्तारं सर्वज्ञमपराजितम् ।
सर्वभूतात्मभूतस्थं प्रणतोऽस्मि सदाशिवम् ॥ ३ ॥

योऽसृजत्सर्वभूतानि ब्रह्माद्यांश्च सुरासुरान् ।
तमहं लोककर्तारं प्रणतोऽस्मि सदाशिवम् ॥ ४ ॥

वरं वरेण्यं वरदं वरिष्ठं वरवाहनम् ।
वनमालाधरं देवं प्रणतोऽस्मि सदाशिवम् ॥ ५ ॥

प्रीतिमत्प्रीतिदातारं सुप्रियं प्रियदर्शनम् ।
उमाप्रियं सदा कान्तं प्रणतोऽस्मि सदाशिवम् ॥ ६ ॥

धर्माधर्ममयं देवं सुखदुःखफलोदयम् ।
बन्धमोक्षप्रणेतारं प्रणतोऽस्मि सदाशिवम् ॥ ७ ॥

1–15. Aghoraśiva in his *Kriyākramadyotikā* at the very end of the performance of nityapūjā, after veneration of vidyāpīṭha, there is a moment for the recitation of hymns, (*Kriyākramadyotikā* p. 120.) suggests a number of scriptural passages that may serve as hymns - *Raurava* upodghāta 6-20; *Kiraṇa* 1:2-9; a passage of the ; *Mataṅga-vidyā-pāda* 1:15-21. We have given those stotras as appendix of this text for the convenience for readers.

मनोबुद्धिरहंकारतन्मात्रेन्द्रियगोचरम् ।
प्रधानपुरुषेशानं प्रणतोऽस्मि सदाशिवम् ॥ ८ ॥

यं ध्यायन्ति महात्मानो मुनयः शंसितव्रताः ।
तमोङ्कारपरं सूक्ष्मं प्रणतोऽस्मि सदाशिवम् ॥ ९ ॥

सूक्ष्मं सर्वगतं नित्यं सर्वविद्येश्वरेश्वरम् ।
सर्वतत्त्वाश्रयं देवं प्रणतोऽस्मि सदाशिवम् ॥ १० ॥

भूमिरापोऽग्निरनलः खमात्मा चन्द्रभास्करौ ।
मनो बुद्धिरहंकारः परा प्रकृतिरेव च ॥ ११ ॥

यस्येच्छामनुवर्तन्ते भावाभावविकारिणीम् ।
तस्मै परमदेवाय पराय परमात्मने ॥ १२ ॥

नमस्ते कालबोधाय कालान्तक नमोऽस्तु ते ।
कालाधिप नमस्तेऽस्तु सर्वकालप्रवर्तक ॥ १८ ॥

कलासकलरूपेण कलाभिर्विश्वरूपधृक् ।
विश्वेश्वर नमस्तेऽस्तु आदिकालप्रवर्तक ॥ १९ ॥

[विद्यापाद १:६–१९]

॥ किरणागमान्तर्गतशिवस्तोत्रम् ॥

जयान्धकपृथुस्कन्धबन्धभेदविचक्षण।
जय प्रवरवीरेशसंरुद्धपुरदाहक॥ १॥

जयाखिलसुरेशानशिरश्छेदभयानक।
जय प्रथितसामर्थ्यमन्मथस्थितिनाशन॥ २॥

जयाच्युततनुध्वंसकालकूटबलापह।
जयावर्तमहाटोपसरिद्वेगविधारण॥ ३॥

जय दारुवनोद्यानमुनिपत्नीविमोहक।
जय नृत्तमहारम्भक्रीडाविक्षोभदारुण॥ ४॥

जयोग्ररूपसंरम्भत्रासितत्रिदशासुर।
जय क्रूरजनेन्द्रास्यदर्शितासृक्सुनिर्झर॥ ५॥

जय वीरपरिस्पन्ददक्षयज्ञविनाशन।
जयाद्भुतमहालिङ्गसंस्थानबलगर्वित॥ ६॥

जय श्वेतनिमित्तोग्रमृत्युदेहनिपातन।
जयाशेषसुखावासकाममोहितशैलज॥ ७॥

जयोपमन्युसन्तापमोहजालतमोहर।
जय पातालमूलोर्ध्वलोकालोकप्रदाहक॥ ८॥

[विद्यापाद १:२-१९]

॥ षट्सहस्रिकान्तर्गतशिवस्तोत्रम् ॥

सर्वज्ञाय नमस्तुभ्यं सर्वकर्त्रे नमोऽस्तु ते।
अविलुप्तस्वरूपाय चिन्मयाय नमोऽस्तु ते॥ १॥

प्रमाणातीतदेहाय नमश्शान्ताय तेजसे।
सत्संवित्करणातीतहानादानान्तरात्मने॥ २॥

अनादिनिधनेशाय शिवाय परमात्मने।
नमस्ते तत्वरूपाय विभवायामितात्मने॥ ३॥

ज्ञानज्ञातृ तथा ज्ञेयव्यतिरिक्ताय ते नमः।
ज्ञप्तिमात्रस्वरूपाय आनन्दब्रह्मणे नमः॥ ४॥

अविद्याव्यतिरिक्ताय विद्यादेहाय ते नमः।
स्वप्रमाणैकगम्याय स्वप्रकाशाय ते नमः।

नऽमोभिमतकर्त्रे ते पञ्चकृत्यैस्सदात्मनाम्॥ ५॥

[क्रियाक्रमद्योतिका पृ १२२]

॥ मतङ्गपारमेश्वरान्तर्गतशिवस्तोत्रम् ॥

भगवन्भूतभव्येश ब्रह्मविष्ण्विन्द्रनायक।
त्वत्प्रसादगुणाविष्टा दिवि दीव्यन्ति देवताः॥ १॥

भवता निखिलं व्याप्तं जगत्स्थावरजङ्गमम्।
त्वत्पादाम्बुजसामर्थ्यस्मरणादपि पापिनः॥ २॥

प्रध्वस्तपापनिचयाः सिद्धिभाजो भवन्ति हि।
किं पुनर्मुनयो धीरास्त्वय्येवार्पितचेतसः॥ ३॥

विमुक्ताः सर्वपापेभ्यो योगिनो विगतस्पृहाः।
विरजस्का विशोकाश्च व्यतिक्रान्तभवार्णवाः॥ ४॥

अन्येऽपि हि सुरेशान लब्धेप्सितवरा नराः।
अहमेकोऽल्पभाग्यस्तु दुःखभाक् सुखवर्जितः॥ ५॥

वज्रोपमं महत्पापं मदीयमथवा विभो।
त्वदीयशक्तयस्तीव्राः संसारोत्तारणं प्रति॥ ६॥

मत्पापनिचयं प्राप्ता लघुतां मृदुतां गताः।
तस्मात् त्वमेव भगवन् वर्तयेथ ममेष्टद॥ ७॥

[विद्यापाद १:१५ –२१]

॥ व्यपोहनस्तवः ॥

सूत उवाच

व्यपोहनस्तवं वक्ष्ये सर्वसिद्धिप्रदं शुभम्।
नन्दिनश्च मुखाच्छ्रुत्वा कुमारेण महात्मना॥ १॥

व्यासाय कथितं तस्माद् बहुमानेन वै मया।
नमः शिवाय शुद्धाय निर्मलाय यशस्विने॥ २॥

दुष्टान्तकाय सर्वाय भवाय परमात्मने।
पञ्चवक्त्रो दशभुजो ह्यक्षपञ्चदशैर्युतः॥ ३॥

शुद्धस्फटिकसंकाशः सर्वाभरणभूषितः।
सर्वज्ञः सर्वगः शान्तः सर्वोपरि सुसंस्थितः॥ ४॥

पद्मासनस्थः सोमेशः पापमाशु व्यपोहतु।
ईशानः पुरुषश्चैव अघोरः सद्य एव च॥ ५॥

वामदेवश्च भगवान् पापमाशु व्यपोहतु।
अनन्तः सर्वविद्येशः सर्वज्ञः सर्वदः प्रभुः॥ ६॥

शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु।
सूक्ष्मः सुरासुरेशानो विश्वेशो गणपूजितः॥ ७॥

शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु।
शिवोत्तमो महापूज्यः शिवध्यानपरायणः॥ ८॥

सर्वगः सर्वदः शान्तः स मे पापं व्यपोहतु।
एकाक्षो भगवानीशः शिवार्चनपरायणः॥ ९॥

शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु।
त्रिमूर्तिर्भगवान् ईशः शिवभक्तिप्रबोधकः॥ १०॥

शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु।
श्रीकण्ठः श्रीपतिः श्रीमान् शिवध्यानरतः सदा॥ ११॥

शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु।
शिखण्डी भगवान् शान्तः शवभस्मानुलेपनः॥ १२॥

शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु।
त्रैलोक्यनमिता देवी सोल्काकारा पुरातनी॥ १३॥

दाक्षायणी महादेवी गौरी हैमवती शुभा।
एकपर्णाग्रजा सौम्या तथा वै चैकपाटला॥ १४॥

अपर्णा वरदा देवी वरदानैकतत्परा।
उमा सुरहरा साक्षात् कौशिकी वा कपर्दिनी॥ १५॥

खट्वाङ्गधारिणी दिव्या कराग्रतरुपल्लवा।
नैगमेयादिभिर्दिव्यैश्चतुर्भिः पुत्रकैर्वृता॥ १६॥

मेनाया नन्दिनी देवी वारिजा वारिजेक्षणा।
अम्बा या वीतशोकस्य नन्दिनश्च महात्मनः॥ १७॥

शुभावत्याः सखी शान्ता पञ्चचूडा वरप्रदा।
सृष्ट्यर्थं सर्वभूतानां प्रकृतित्वं गताव्यया॥ १८॥

त्रयोविंशतिभिस्तत्त्वैर्महदाद्यैर्विजृम्भिता।
लक्ष्म्यादिशक्तिभिर्नित्यं नमिता नन्दनन्दिनी॥ १९॥

मनोन्मनी महादेवी मायावी मण्डनप्रिया।
मायया या जगत्सर्वं ब्रह्माद्यं सचराचरम्॥ २०॥

क्षोभिणी मोहिनी नित्यं योगिनां हृदि संस्थिता।
एकानेकस्थिता लोके इन्दीवरनिभेक्षणा॥ २१॥

भक्त्या परमया नित्यं सर्वदेवैरभिष्टुता।
गणेन्द्राम्भोजगर्भेन्द्रयमवित्तेशपूर्वकैः॥ २२॥

संस्तुता जननी तेषां सर्वोपद्रवनाशिनी।
भक्तानामार्तिहा भव्या भवभावविनाशनी॥ २३॥

भुक्तिमुक्तिप्रदा दिव्या भक्तानामप्रयत्नतः।
सा मे साक्षान्महादेवी पापमाशु व्यपोहतु॥ २४॥

चण्डः सर्वगणेशानो मुखाच्छंभोर्विनिर्गतः।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु॥ २५॥

शालङ्कायनपुत्रस्तु हलमार्गोत्थितः प्रभुः।
जामाता मरुतां देवः सर्वभूतमहेश्वरः॥ २६॥

सर्वगः सर्वदृक् शर्वः सर्वेशसदृशः प्रभुः।
सनारायणकैर् देवैः सेन्द्रचन्द्रदिवाकरैः॥ २७॥

सिद्धैश्च यक्षगन्धर्वैर्भूतैर्भूतविधायकैः।
उरगैर्ऋषिभिश्चैव ब्रह्मणा च महात्मना॥ २८॥

स्तुतस्त्रैलोक्यनाथस्तु मुनिरन्तः पुरं स्थितः।
सर्वदा पूजितः सर्वैर्नन्दी पापं व्यपोहतु॥ २९॥

महाकायो महातेजा महादेव इवापरः।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु॥ ३०॥

मेरुमन्दारकैलास तटकूटप्रभेदनः।
ऐरावतादिभिर्दिव्यैर्दिग्गजैश्च सुपूजितः॥ ३१॥

सप्तपातालपादश्च सप्तद्वीपोरुजङ्घकः।
सप्तार्णवाङ्कुशश्चैव सर्वतीर्थोदरः शिवः॥ ३२॥

आकाशदेहो दिग्बाहुः सोमसूर्याग्निलोचनः।
हतासुरमहावृक्षो ब्रह्मविद्यामहोत्कटः॥ ३३॥

ब्रह्माद्याधोरणैर्दिव्यैर्योगपाशसमन्वितैः।
बद्धो हृत्पुण्डरीकाख्ये स्तंभे वृत्तिं निरुध्य च॥ ३४॥

नागेन्द्रवक्त्रो यः साक्षाद् गणकोटिशतैर्वृतः।
शिवध्यानैकसम्पन्नः स मे पापं व्यपोहतु॥ ३५॥

भृङ्गीशः पिङ्गलाक्षोऽसौ भसिताशस्तु देहयुक्।
शिवार्चनरतः श्रीमान् स मे पापं व्यपोहतु॥ ३६॥

चतुर्भिस्तनुभिर् नित्यं सर्वासुरनिबर्हणः।
स्कन्दः शक्तिधरः शान्तः सेनानीः शिखिवाहनः॥ ३७॥

देवसेनापतिः श्रीमान् स मे पापं व्यपोहतु।
भवः शर्वस्तथेशानो रुद्रः पशुपतिस्तथा॥ ३८॥

उग्रो भीमो महादेवः शिवार्चनरतः सदा।
एताः पापं व्यपोहन्तु मूर्तयः परमेष्ठिनः॥ ३९॥

महादेवः शिवो रुद्रः शङ्करो नीललोहितः।
ईशानो विजयो भीमो देवदेवो भवोद्भवः॥ ४०॥

कपालीशश्च विज्ञेयो रुद्रा रुद्रांशसंभवाः।
शिवप्रणामसम्पन्ना व्यपोहन्तु मलं मम॥ ४१॥

विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः।
लोकप्रकाशकश्चैव लोकसाक्षी त्रिविक्रमः॥ ४२॥

आदित्यश्च तथा सूर्यश्चांशुमांश्च दिवाकरः।
एते वै द्वादशादित्या व्यपोहन्तु मलं मम॥ ४३॥

गगनं स्पर्शनं तेजो रसश्च पृथिवी तथा।
चन्द्रः सूर्यस्तथात्मा च तनवः शिवभाषिताः॥ ४४॥

पापं व्यपोहन्तु मम भयं निर्णाशयन्तु मे।
वासवः पावकश्चैव यमो निर्ऋतिरेव च॥ ४५॥

वरुणो वायुसोमौ च ईशानो भगवान् हरिः।
पितामहश्च भगवान् शिवध्यानपरायणाः॥ ४६॥

एते पापं व्यपोहन्तु मनसा कर्मणा कृतम्।
नभस्वान्स्पर्शनो वायुरनिलो मारुतस्तथा॥ ४७॥

प्राणः प्राणेशजीवेशौ मारुतः शिवभाषिताः।
शिवार्चनरताः सर्वे व्यपोहन्तु मलं मम॥ ४८॥

खेचरी वसुचारी च ब्रह्मेशो ब्रह्मब्रह्मधीः।
सुषेणः शाश्वतः पुष्टः सुपुष्टश्च महाबलः॥ ४९॥

एते वै चारणाः शंभोः पूजयातीव भाविताः।
व्यपोहन्तु मलं सर्वं पापं चैव मया कृतम्॥ ५०॥

मन्त्रज्ञो मन्त्रवित् प्राज्ञो मन्त्रराट् सिद्धपूजितः।
सिद्धवत्परमः सिद्धः सर्वसिद्धिप्रदायिनः॥ ५१॥

व्यपोहन्तु मलं सर्वे सिद्धाः शिवपदार्चकाः।
यक्षो यक्षेशधनदो जृम्भको मणिभद्रकः॥ ५२॥

पूर्णभद्रेश्वरो माली शितिकुण्डलिरेव च।
नरेन्द्रश्चैव यक्षेशा व्यपोहन्तु मलं मम॥ ५३॥

अनन्तः कुलिकश्चैव वासुकिस्तक्षकस्तथा।
कर्कोटको महापद्मः शङ्खपालो महाबलः॥ ५४॥

शिवप्रणामसम्पन्नाः शिवदेहप्रभूषणाः।
मम पापं व्यपोहन्तु विषं स्थावरजङ्गमम्॥ ५५॥

वीणाज्ञः किन्नरश्चैव सुरसेनः प्रमर्दनः।
अतीशयः स प्रयोगी गीतज्ञश्चैव किन्नराः॥ ५६॥

शिवप्रणामसम्पन्ना व्यपोहन्तु मलं मम।
विद्याधरश्च विबुधो विद्याराशिर्विदांवरः॥ ५७॥

विबुद्धो विबुधः श्रीमान् कृतज्ञश्च महायशाः।
एते विद्याधराः सर्वे शिवध्यानपरायणाः॥ ५८॥

व्यपोहन्तु मलं घोरं महादेवप्रसादतः।
वामदेवो महाजम्भः कालनेमिर्महाबलः॥ ५९॥

सुग्रीवो मर्दकश्चैव पिङ्गलो देवमर्दनः।
प्रह्लादश्चाप्यनुह्लादः संह्लादः किल बाष्कलौ॥ ६०॥

जम्भः कुंभश्च मायावी कार्तवीर्यः कृतंजयः।
एते सुरा महात्मानो महादेवपरायणाः॥ ६१॥

व्यपोहन्तु भयं घोरम् आसुरं भावमेव च।
गरुत्मान् खगतिश्चैव पक्षिराट् नागमर्दनः॥ ६२॥

नागशत्रुर्हिरण्याङ्गो वैनतेयः प्रभञ्जनः।
नागाशीर्विषनाशश्च विष्णुवाहन एव च॥ ६३॥

एते हिरण्यवर्णाभा गरुडा विष्णुवाहनाः।
नानाभरणसम्पन्ना व्यपोहन्तु मलं मम॥ ६४॥

अगस्त्यश्च वसिष्ठश्च अङ्गिरा भृगुरेव च।
काश्यपो नारदश्चैव दधीचश्च्यवनस्तथा॥ ६५॥

उपमन्युस्तथान्ये च ऋषयः शिवभाविताः।
शिवार्चनरताः सर्वे व्यपोहन्तु मलं मम॥ ६६॥

पितरः पितामहाश्च तथैव प्रपितामहाः।
अग्निष्वात्ता बर्हिषदस्तथा मातामहादयः॥ ६७॥

व्यपोहन्तु भयं पापं शिवध्यानपरायणाः।
लक्ष्मीश्च धरणी चैव गायत्री च सरस्वती॥ ६८॥

दुर्गा उषा शची ज्येष्ठा मातरः सुरपूजिताः।
देवानां मातरश्चैव गणानां मातरस्तथा॥ ६९॥

भूतानां मातरः सर्वा यत्र या गणमातरः।
प्रसादाद्देवदेवस्य व्यपोहन्तु मलं मम॥ ७०॥

उर्वशी मेनका चैव रंभा रतितिलोत्तमाः।
सुमुखी दुर्मुखी चैव कामुकी कामवर्धनी॥ ७१॥

तथान्याः सर्वलोकेषु दिव्याश्चाप्सरसस्तथा।
शिवाय ताण्डवं नित्यं कुर्वन्त्योऽतीव भाविताः॥ ७२॥

देव्यः शिवार्चनरता व्यपोहन्तु मलं मम।
अर्कः सोमोऽङ्गारकश्च बुधश्चैव बृहस्पतिः॥ ७३॥

शुक्रः शनैश्चरश्चैव राहुः केतुस्तथैव च।
व्यपोहन्तु भयं घोरं ग्रहपीडां शिवार्चकाः॥ ७४॥

मेषो वृषोऽथ मिथुनस् तथा कर्कटकः शुभः।
सिंहश्च कन्या विपुला तुला वै वृश्चिकस्तथा॥ ७५॥

धनुश्च मकरश्चैव कुंभो मीनस्तथैव च।
राशयो द्वादशा ह्येते शिवपूजापरायणाः॥ ७६॥

व्यपोहन्तु भयं पापं प्रसादात्परमेष्ठिनः।
अश्विनी भरणी चैव कृत्तिका रोहिणी तथा॥ ७७॥

श्रीमन्मृगशिरश्चार्द्रा पुनर्वसुपुष्यसार्पकाः।
मघा वै पूर्वफाल्गुन्य उत्तराफाल्गुनी तथा॥ ७८॥

हस्तचित्रा तथा स्वाती विशाखा चानुराधिका।
ज्येष्ठा मूलं महाभागा पूर्वाषाढा तथैव च॥ ७९॥

उत्तराषाढिका चैव श्रवणं च श्रविष्ठिका।
शतभिषक् पूर्वभद्रा तथा प्रोष्ठपदा तथा॥ ८०॥

पौष्णं च देव्यः सततं व्यपोहन्तु मलं मम।
ज्वरः कुम्भोदरश्चैव शङ्कुकर्णो महाबलः॥ ८१॥

महाकर्णः प्रभातश्च महाभूतप्रमर्दनः।
श्येनजिच्छिवदूतश्च प्रमथाः प्रीतिवर्धनाः॥ ८२॥

कोटिकोटिशतैश्चैव भूतानां मातरः सदा।
व्यपोहन्तु भयं पापं महादेवप्रसादतः॥ ८३॥

शिवध्यानैकसम्पन्नो हिमराड् अंबुसन्निभः।
कुन्देन्दुसदृशाकारः कुंभकुन्देन्दुभूषणः॥ ८४॥

वडवानलशत्रुर्यो वडवामुखभेदनः।
चतुष्पादसमायुक्तः क्षीरोद इव पाण्डुरः॥ ८५॥

रुद्रलोके स्थितो नित्यं रुद्रैः सार्धं गणेश्वरैः।
वृषेन्द्रो विश्वधृग् देवो विश्वस्य जगतः पिता॥ ८६॥

वृतो नन्दादिभिर्नित्यं मातृभिर्मखमर्दनः।
शिवार्चनरतो नित्यं स मे पापं व्यपोहतु॥ ८७॥

गङ्गा माता जगन्माता रुद्रलोके व्यवस्थिता।
शिवभक्ता तु या नन्दा सा मे पापं व्यपोहतु॥ ८८॥

भद्रा भद्रपदा देवी शिवलोके व्यवस्थिता।
माता गवां महाभागा सा मे पापं व्यपोहतु॥ ८९॥

सुरभिः सर्वतोभद्रा सर्वपापप्रणाशनी।
रुद्रपूजारता नित्यं सा मे पापं व्यपोहतु॥ ९०॥

सुशीला शीलसम्पन्ना श्रीप्रदा शिवभाविता।
शिवलोके स्थिता नित्यं सा मे पापं व्यपोहतु॥ ९१॥

वेदशास्त्रार्थतत्त्वज्ञः सर्वकार्याभिचिन्तकः।
समस्तगुणसम्पन्नः सर्वदेवेश्वरात्मजः॥ ९२॥

ज्येष्ठः सर्वेश्वरः सौम्यो महाविष्णुतनुः स्वयम्।
आर्यः सेनापतिः साक्षाद् गहनो मखमर्दनः॥ ९३॥

ऐरावतगजारूढः कृष्णकुञ्चितमूर्धजः।
कृष्णाङ्गो रक्तनयनः शशिपन्नगभूषणः॥ ९४॥

भूतैः प्रेतैः पिशाचैश्च कूष्माण्डैश्च समावृतः।
शिवार्चनरतः साक्षात् स मे पापं व्यपोहतु॥ ९५॥

ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा।
वाराही चैव माहेन्द्री चामुण्डाग्नेयिका तथा॥ ९६॥

एता वै मातरः सर्वाः सर्वलोकप्रपूजिताः।
योगिनीभिर्महापापं व्यपोहन्तु समाहिताः॥ ९७॥

वीरभद्रो महातेजा हिमकुन्देन्दुसन्निभः।
रुद्रस्य तनयो रौद्रः शूलासक्तमहाकरः॥ ९८॥

सहस्रबाहुः सर्वज्ञः सर्वायुधधरः स्वयम्।
त्रेताग्निनयनो देवस्त्रैलोक्याभयदः प्रभुः॥ ९९॥

मातृणां रक्षको नित्यं महावृषभवाहनः।
त्रैलोक्यनमितः श्रीमान् शिवपादार्चने रतः॥ १००॥

यज्ञस्य च शिरश्छेत्ता पूष्णो दन्तविनाशनः।
वह्नेर्हस्तहरः साक्षाद् भगनेत्रनिपातनः॥ १०१॥

पादाङ्गुष्ठेन सोमाङ्गपेषकः प्रभुसंज्ञकः।
उपेन्द्रेन्द्रयमादीनां देवानामङ्गरक्षकः॥ १०२॥

सरस्वत्या महादेव्या नासिकोष्ठावकर्तनः।
गणेश्वरो यः सेनानीः स मे पापं व्यपोहतु॥ १०३॥

ज्येष्ठा वरिष्ठा वरदा वराभरणभूषिता।
महालक्ष्मीर्जगन्माता सा मे पापं व्यपोहतु॥ १०४॥

महामोहा महाभागा महाभूतगणैर्वृता।
शिवार्चनरता नित्यं सा मे पापं व्यपोहतु॥ १०५॥

लक्ष्मीः सर्वगुणोपेता सर्वलक्षणसंयुता।
सर्वदा सर्वगा देवी सा मे पापं व्यपोहतु॥ १०६॥

सिंहारूढा महादेवी पार्वत्यास्तनयाव्यया।
विष्णोर्निद्रा महामाया वैष्णवी सुरपूजिता॥ १०७॥

त्रिनेत्रा वरदा देवी महिषासुरमर्दिनी।
शिवार्चनरता दुर्गा सा मे पापं व्यपोहतु॥ १०८॥

ब्रह्माण्डधारका रुद्राः सर्वलोकप्रपूजिताः।
सत्याश्च मानसाः सर्वे व्यपोहन्तु भयं मम॥ १०९॥

भूताः प्रेताः पिशाचाश्च कूष्माण्डगणनायकाः।
कूष्माण्डकाश्च ते पापं व्यपोहन्तु समाहिताः॥ ११०॥

अनेन देवं स्तुत्वा तु चान्ते सर्वं समापयेत्।
प्रणम्य शिरसा भूमौ प्रतिमासे द्विजोत्तमाः॥ १११॥

व्यपोहनस्तवं दिव्यं यः पठेच्छृणुयादपि।
विधूय सर्वपापानि रुद्रलोके महीयते॥ ११२॥

कन्यार्थी लभते कन्यां जयकामो जयं लभेत्।
अर्थकामो लभेदर्थं पुत्रकामो बहून् सुतान्॥ ११३॥

विद्यार्थी लभते विद्यां भोगार्थी भोगमाप्नुयात्।
यान्यान्प्रार्थयते कामान् मानवः श्रवणादिह॥ ११४॥

तान्सर्वान् शीघ्रमाप्नोति देवानां च प्रियो भवेत्।
पठ्यमानमिदं पुण्यं यमुद्दिश्य तु पठ्यते॥ ११५॥

तस्य रोगा न बाधन्ते वातपित्तादिसंभवाः।
नाकाले मरणं तस्य न सर्पैरपि दश्यते॥ ११६॥

यत्पुण्यं चैव तीर्थानां यज्ञानां चैव यत्फलम्।
दानानां चैव यत्पुण्यं व्रतानां च विशेषतः॥ ११७॥

तत्पुण्यं कोटिगुणितं जप्त्वा चाप्नोति मानवः।
गोघ्नश्चैव कृतघ्नश्च वीरहा ब्रह्महा भवेत्॥ ११८॥

शरणागतघाती च मित्रविश्वासघातकः।
दुष्टः पापसमाचारो मातृहा पितृहा तथा॥ ११९॥

व्यपोह्य सर्वपापानि शिवलोके महीयते॥ १२०॥

[लिङ्गपुराण १:८२:१-१२०]

इति श्रीलिङ्गमहापुराणे पूर्वभागे व्यपोहनस्तवनिरूपणं नाम द्व्यशीतितमोऽध्यायः॥

व्यपोहनस्तवं सम्पूर्णम्॥ शुभमस्तु॥

॥ पञ्चावरणस्तवः ॥

आदित्यबिम्बमध्यस्थं रक्तमूर्तिं सदाशिवम्।
प्रणम्य परिवारेण स्तोष्येऽभ्यर्चितमीश्वरम्॥ १॥

पद्मासनं रक्ततनुं द्विनेत्रं श्वेताब्जयुक्तांसगहस्तयुग्मम्।
रक्ताम्बरालेपनमाल्यभूष्यं स्थितं सहाङ्गैः शिवसूर्यमीडे॥ २॥

सोमं सितं बुधं गौरं गुरुं गोरोचनाद्युतिम्।
शुक्रं शुक्लं च पूर्वादिदिक्ष्वथाग्न्यादिकोणगान्॥ ३॥

रक्तं भौमं श्यामदेहं च सौरिं
कृष्णं राहुं धूम्रवर्णं च केतुम्।
वामैर्हस्तैर्नौमि तान् षट् समेतान्
वामोरुस्थैर्दक्षिणैः साभयैश्च॥ ४॥

अर्धकायोर्ध्वकेशौ च राहुकेतू कृताञ्जली।
अब्जाभयकरं रक्तं तेजश्चण्डमुपास्महे॥ ५॥

ऊर्ध्वोदुम्बरमुखदक्षिणे निविष्टं
श्यामाङ्गं गणपतिमाश्रये दधानम्।
वामे लड्डुकपरशुं कराब्जयुग्मे
दन्तं च स्वकमपरत्र चाक्षमालाम्॥ ६॥

ऊर्ध्वोदुम्बरमुखवामतो निविष्टां
वन्देऽहं धवलरुचिं सरस्वतीं च।
वामे पुस्तकमथ दक्षिणेऽक्षमालां
बिभ्राणां करयुगले वराभये च॥ ७॥

तन्मध्यतः कमलमध्यसुखोपविष्टां
हस्तिद्वयोद्धृतघटाम्बुकृताभिषेकाम्।
सव्ये वराब्जसहितां महतीं च लक्ष्मीं
वामे तु बिल्वफलपद्मधरां सुपीताम्॥ ८॥

शूलाक्षमाले दधतं कराभ्यां
वामेतराभ्यां जटिलं त्रिणेत्रम्।
द्वारदक्षिणस्थां समवाप्य शाखां
रक्तं स्थितं नन्दिनमाश्रयामि॥ ९॥

तदुत्तरे तत्र निविष्टमूर्तिं गङ्गां च शुक्लां मकराधिरूढाम्।
हस्तद्वये दक्षिणवामसंस्थे नीलोत्पलं पूर्णघटं वहन्तीम्॥ १०॥
तद्वामशाखास्थितकृष्णमूर्तिं नागोपवीतं जटिलं सुदंष्ट्रम्।
कपालशूलान्वितवामसव्यकरं महाकालमहं प्रपद्ये॥ ११॥
यमुनां दक्षिणे तस्य श्यामां कूर्मस्थितां भजे।
वामदक्षिणहस्तस्थपूर्णकुम्भासितोत्पलाम्॥ १२॥
कल्पान्ताग्निप्रभं चास्त्रमथोदुम्बरगं भजे।
दिव्यान्तरिक्षभूमिष्ठविघ्नसङ्घनिवारकम्॥ १३॥

[वास्तुपतिपूजा]

हंसाब्जस्थं तुन्दिलं लम्बकूर्चं
गौरं वन्दे युक्तमास्यैश्चतुर्भिः।
हस्तद्वन्द्वे कुण्डिकां स्रुक्समेतां
वामेऽन्यस्मिन्साक्षमालं स्रुवं च॥ १४॥

तं वास्तुपं निर्ऋतिकोणगतं गणेशं
विघ्नापहं तदनु वायुगमुक्तरूपम्।
सौम्ये महापदयुतां श्रियमुक्तरूपां
वन्दे स्थितां च गुरुपद्धतिमीशकोणे॥ १५॥

[गुरुपद्धतिः]

सदाशिवमनन्तं च श्रीकण्ठं पुनरम्बिकाम्।
गुहं विष्णुं च धातारं गुरून् सप्त समाश्रये॥ १६॥

[आसनपूजा]

आधारशक्तिं क्षीरोदवर्णां बीजाङ्कुराकृतिम्।
सर्वाधारां भजे मध्ये स्थिरां कूर्मशिलास्थिताम्॥ १७॥

प्रपञ्चव्याप्तितो ब्रह्मशिलास्थं मन्त्रनायकम्।
मायापद्मासनं श्वेतमनन्तं प्रणमाम्यहम्॥ १८॥

धर्मज्ञाने श्वेतरक्ते सुपीतं
वैराग्यं चैश्वर्यमीडेऽतिकृष्णम्।
सिंहाकारानन्तसामर्थ्यरूपान्
शम्भोः पीठेऽग्न्यादिकोणस्थपादान्॥ १९॥

कृष्णं श्वेतं श्वेतरक्तं द्वितीयं
रक्तं पीतं पीतकृष्णं क्रमेण।
चत्वार्यस्मिन् गात्रकाणीशपीठे
पूर्वाद्याशासंस्थितानि प्रपद्ये॥ २०॥

मायाधश्छदनं रक्तं विद्योर्ध्वच्छदनं सितम्।
प्रणमामि क्रमान्न्यस्य निर्ऋतीशानकोणयोः॥ २१॥

शुद्धविद्यामयं पद्मं विद्येश्वरदलाष्टकम्।
पीतां च कर्णिकां वन्दे पञ्चाशद्बीजगर्भिताम्॥ २२॥

वरप्रदेशाङ्कितवामहस्तं सव्यद्विहस्ताभयचामरं च।
रक्तं जटाचूडशशाङ्करेखं विभूषणैर्भूषितविश्वगात्रम्॥ २३॥

पूर्वादिदिक्केसरपूज्यमानं
वामादिशक्त्यष्टकमानतोऽस्मि।
तत्तुल्यरूपामथ कर्णिकायां
मनोन्मनीं शुक्लतनुं निविष्टाम्॥ २४॥

मण्डलत्रितयं वन्दे सूर्यसोमहविर्भुजाम्।
वक्ष्यमाणाकृतीन् ब्रह्मविष्णुरुद्रांश्च तत्पतीन्॥ २५॥

तदन्तःसंस्थितं शम्भोः शक्तिमण्डलमद्भुतम्।
तत्पतिं कारणेशानमहं वन्दे महेश्वरम्॥ २६॥

क्षित्यादिकुटिलाप्रान्तसमस्ताध्वमयं शुभम्।
योगपीठमिदं दिव्यं शिवस्यासनमाश्रये॥ २७॥

[सदाशिवः]

तत्रासीनं स्फटिकसदृशश्रीमदागुल्फगात्रं
ब्रह्मोत्थाष्टान्वितमनुकलात्रिंशदारब्धमूर्तिम्।
प्रत्यक् श्वेतं वदनमरुणं चोत्तरं कृष्णवर्णं
याम्यं पूर्वं कनकरुचिरं शुक्लमूर्ध्वं दधानम्॥ २८॥

रक्तपादकराम्भोजं प्रतिवक्त्रं त्रिलोचनम्।
ज्ञानचन्द्रकलाचूडं बद्धपद्मासनं शिवम्॥ २९॥
सुप्रसन्नं स्मितोपेतं जटामकुटधारिणम्।
षोडशाब्दवपुर्लक्ष्यं द्वात्रिंशल्लक्षणान्वितम्॥ ३०॥

वामैः खेटं चापयुक्तं कपालं
बिभ्राणं वा कुण्डिकां चाभयं च।
वन्दे खड्गं बाणखट्वाङ्गयुक्तं
हस्तैरन्यैरक्षमालां वरं च॥ ३१॥

वामेतरेषु निजपाणितलेषु यद्वा
नागाक्षसूत्रडमरूत्पलबीजपूरैः।
खट्वाङ्गशूलवरशक्त्यभयैश्च भक्त्या
वन्दामहे वरतनुं सकलस्वरूपम्॥ ३२॥

सर्वज्ञं सर्वकर्तारं सर्वानुग्राहकं परम्।
अनादिपाशरहितं निष्कलं चाविकारिणम्॥ ३३॥

सृष्टिस्थितिप्रलयरक्षणनामधेयैः
कृत्यैः पशोर्मलमलं परिपाच्य मोक्षम्।
दीक्षात्मकेन करणेन कृपाम्बुराशे

पाशत्रयात् पशुपते कृपया करोषि॥ ३४॥

विहितसलिलभस्मस्नानसन्ध्याप्रणामाः
कृतदिनकरपूजाः पञ्च शुद्धीर्विधाय।
विधिवदिह यजन्ते दीक्षिता ये नरास्त्वां
प्रदिशसि शिव तेभ्यो विघ्नहीनां विमुक्तिम्॥ ३५॥

ये चात्र शुद्धभुवनोद्भवभोगकामास्
त्वामर्चयन्ति विविधैर्यजनप्रकारैः।
तेभ्यः प्रदाय परमेश्वर साधकेभ्यो
भोगान् ददासि तदनन्तरमेव मोक्षम्॥ ३६॥

ये चैहिकानि हृदयामयरोगशान्ति–
शून्यानि यानि विविधानि फलानि लब्धुम्।
वाञ्छन्ति तानि सकलानि विधाय तेषाम्
आदेहपातमथ नाथ करोषि मोक्षम्॥ ३७॥

शैवज्ञानमथाभिषेकसहिता दीक्षा हि मोक्षप्रदा
पूज्याद्यैस्तव पूजनोपकरणं हृद्रोगनिर्नाशनम्।
भक्तिर्भक्तजने गृहे निरुपमा स्फीता च लक्ष्मीर्भवेद्
यत्स्यात्त्वत्पदसेवितान्न सुलभं किं तत् कृपाम्भोनिधे॥ ३८॥

यत्कर्म नाथ मम जातमबुद्धिपूर्वं
दीक्षोत्तरं विचरतो विहितेतरं स्यात्।
तत्सर्वमेव भवतः स्मृतिमात्ररुद्धं
क्रव्यादयोनिसमवाप्तिफलं न भूयात्॥ ३९॥

आदेहपातमिह मेऽभिमतार्थसिद्धि-
भूर्यान्महेश हृदयामयनाशनं च।
प्रारब्धदेहसहकारिमलांशनाशा-
दन्ते च विघ्नरहितः परमोक्षलाभः॥ ४०॥

अव्यक्ताख्ये व्यक्तरूपेऽथ लिङ्गे
व्यक्ताव्यक्ते स्थण्डिले वार्चयन्ति।
ये त्वां नित्यं नाथ तेषां ध्रुवं स्यात्
पाशप्रोतात् पातकेभ्यश्च मुक्तिः॥ ४१॥

मूर्ध्नोरसा करयुगेन पदद्वयेन
वाचा दृशा विमलया मनसा च बुद्ध्या।
विद्येश्वरादिनिखिलात्मगणाभिराध्यं
तं त्वामहं स्तुतिपदैः प्रणतोऽस्मि भक्त्या॥ ४२॥

[शक्तिः]

ज्ञानक्रियेच्छाप्रमुखैरनन्तै-
र्भेदैरुपेतामुपचारयुक्त्या।
सृष्ट्यादिकृत्येषु कृपाम्बुराशेः
शक्तिं विभोः शक्तिमतः प्रपद्ये॥ ४३॥

या देशिकाङ्गस्थितविश्वनाथ-
व्यापारहस्ताग्निविभक्तरूपा।
छिनत्ति पाशानखिलान् पशूनां
तां शक्तिमाद्यां शरणं व्रजामि॥ ४४॥

केचिद्वदन्ति भवतीमिह शैलकन्याम्
अन्येऽपि वाचमपरे कमलां मुनीन्द्राः।
एके पुनः प्रकृतिमेव परेऽपि मायां
बिन्दुं च केऽपि वयमीश्वरशक्तिमाद्याम्॥ ४५॥

एतानि भक्त्युपहृतानि मयात्र शम्भोर्
अङ्गानि पूजनविधौ सकलानि कृत्वा।
पूजाफलं मम समस्तमपेतविघ्नं
पूर्णं विधेहि परमेश्वरि पाहि मां त्वम्॥ ४६॥

[अन्तरावरणम् (ब्रह्ममन्त्राः)]

ईशानमानमत पङ्कजकर्णिकेश–
भागोपविष्टममलेन्दुजटाङ्कमौलिम्।
शूलाभयान्वितकरद्वयमेकवक्त्रं
सौम्याननं स्फटिकशुद्धतनुं त्रिणेत्रम्॥ ४७॥

सव्येऽक्षसूत्रमपरत्र च मातुलङ्गं
हस्ते दधानमखिलाभरणं त्रिणेत्रम्।
पीतं जटेन्दुमकुटं तपनायुताभं
पीतानुलेपवसनं पुरुषं प्रपद्ये॥ ४८॥

वामैः खट्वाङ्गमुण्डे दधतमथ करैः खेटपाशौ च भीमं
शूलं टङ्कं च खड्गं डमरुकमपरैर्दंष्ट्रिणं याम्यपत्रे।
पिङ्गभ्रूश्मश्रुनेत्रं कपिलतरजटं वृश्चिकालब्धकण्ठं
वन्दे घोरं सुकृष्णं शशिशकलधरं भोगिभिर्भूषिताङ्गम्॥ ४९॥

रक्तानुलेपकुसुमाम्बरनेत्रयुग्मं
कान्ताखिलाङ्गमखिलाभरणैरुपेतम्।
वामे सखेटमपरत्र च खड्गपाणिं
सौम्ये दले सुमुखमर्चत वामदेवम्॥ ५०॥

शुक्लांशुशुक्लकुसुमाम्बरगन्धभूष्यं
पश्चादजातमखिलाभरणोपपन्नम्।
एकाननं शशिधरं जटिलं त्रिणेत्रं
वन्दे वराभयकरं नवयौवनाढ्यम्॥ ५१॥

पञ्चेशादीनपि च यदि वा सुस्मितान् सौम्यदृष्टीन्
कान्ताकारान् करसरसिजैरष्टभिः शोभमानान्।
दिक्स्थैश्चास्यैर्नमत निखिलैर्भूषितैर्भूषिताङ्गान्
प्रोक्तैर्वर्णैर्जटिलशिरसश्चन्द्ररेखावतंसान्॥ ५२॥

[अन्तरावरणम् (अङ्गमन्त्राः)]

पद्मेशानदलाग्रस्थं नेत्रत्रयमहं भजे।
दृक्क्रियेच्छात्मकं तत्त्वं मण्डलत्रितयाश्रितम्॥ ५३॥

ज्ञानशक्त्यात्मकं शम्भोर्हृदयं वह्निपत्रगम्।
सर्वात्मानं सितं यद्वा दीप्तं त्रिणयनं भजे॥ ५४॥

ईशपत्रगतं गौरं धूम्रं वा सुशिवं शिरः।
सर्वेशितात्मकैश्वर्यं शिवस्योज्ज्वलभूषणम्॥ ५५॥

ज्वालिनीं च शिखां रक्तां कृष्णां वा नैर्ऋते दले।
वशितामपराधीनां वक्ष्यमाणाकृतिं विभोः॥ ५६॥

पिङ्गलं कवचं कृष्णं हरितं वानिलाश्रयम्।
विश्वरक्षाकरं वन्दे तेजो विश्वाधिकं विभोः॥ ५७॥

शिवास्त्रं प्रलयार्काभं चतुर्दिक्षु कृतार्चनम्।
वन्दे प्रतापमीशस्य दंष्ट्रिणं भीमनिस्वनम्॥ ५८॥

अङ्गानि चोद्धृतवराभयशक्तिशूलान्य्
अब्जासनान्यभिमुखानि शिवस्य वन्दे।
आस्यैश्चतुर्भिरथवा सवराभयानि
चैकाननानि सजटेन्दुविभूषणानि॥ ५९॥

[द्वितीयावरणम् (विद्येश्वराः)]

द्वितीयावरणे प्राच्यामनन्तं हेमसन्निभम्।
सूक्ष्मं च वह्निभागस्थं वन्दे वह्निसमत्विषम्॥ ६०॥

तमालसन्निभं वन्दे याम्यभागे शिवोत्तमम्।
नैर्ऋते षट्पदाभासमेकनेत्रमवस्थितम्॥ ६१॥

कुन्देन्दुधवलाकारमेकरुद्रं तु वारुणे।
त्रिमूर्तिं मारुते भागे नीहारनिभमाश्रये॥ ६२॥

श्रीकण्ठं सोमदिग्भागे रक्तवर्णमवस्थितम्।
प्रपद्ये पाण्डराकारमैशाने च शिखण्डिनम्॥ ६३॥

चतुरः प्राक्तनान् दिक्षु विदिक्ष्वन्यानवस्थितान्।
यद्वा विद्येश्वरान् वन्दे स्वस्वदिक्पतिसन्निभान्॥ ६४॥

खड्गं बाणमथाक्षसूत्रमभयं पद्मं च सव्यैः करैर्

वामैः खेटधनुःकमण्डलुवरान् शूलान्वितान् बिभ्रतः।
पद्मस्थांश्चतुराननान् प्रतिमुखं नेत्रत्रयेणान्वितान्
विद्येशान् रुचिराननान् धृतजटाजूटेन्दुखण्डान् भजे॥ ६५॥

यद्वा करैरष्टभिरेव युक्तान्
प्रागुक्तवर्णाकृतिशोभमानान्।
एकाननान्वा करपङ्कजाभ्यां
कृताञ्जलीनीशमुखानशेषान्॥ ६६॥

[तृतीयावरणम् (गणाः)]

तृतीयावरणे प्राच्यां चतुर्हस्तं विमानगम्।
सवराभयशूलाक्षसूत्रं रक्तं च नन्दिनम्॥ ६७॥

कपालखड्गान्वितवामहस्तं
खेटत्रिशूलान्वितसव्यपाणिम्।
पीनाङ्गमापिङ्गजटं सुभीमं
वन्दे महाकालमथाग्निभागे॥ ६८॥

स्नाय्वस्थित्वङ्निबद्धाङ्गं याम्यभागे सितच्छविम्।
विमानवर्तिनं त्र्यक्षं भृङ्गिसंज्ञं गणं भजे॥ ६९॥

गणेशं वामनाकारं प्रोक्तरूपयुतं भजे।
राक्षसाशास्थितं त्र्यक्षं शूर्पकर्णं गजाननम्॥ ७०॥

प्रत्यगाशास्थितं वन्दे वृषं च वृषभाकृतिम्।
साक्षाद्धर्मं सितं त्र्यक्षं परमेशस्य वाहनम्॥ ७१॥

पीतं शक्तिं सघण्टां ध्वजमथ कमलं कुक्कुटं प्रासदण्डौ

बिभ्राणं वायुभागे वरमभयधनुर्बाणटङ्कांश्च हस्तैः।
षड्वक्त्रं द्वादशाक्षं शिखिनि शरभवं पाणिभिर्वा चतुर्भिर्
वक्त्रैक्ये शक्त्यभीभ्यां भजत वरयुतं कुक्कुटं चादधानम्॥ ७२॥

सिंहारूढामहं वन्दे भूषितां दर्पणोद्वहाम्।
सौम्यभागे स्थितां देवीं द्विभुजां गौरविग्रहाम्॥ ७३॥

चण्डेश्वरं विमानस्थं वक्ष्यमाणाकृतिं नुमः।
ईश्वराशागतं कृष्णं गणेशावरणे स्थितम्॥ ७४॥

[चतुर्थावरणम् (लोकपालाः)]

हेमवर्णं सहस्राक्षं वज्रहस्तं गजाश्रयम्।
पूर्वाशानायकं वन्दे चतुर्थावरणे स्थितम्॥ ७५॥

मेषारूढं प्रदीप्तार्चिर्भासुरं हव्यवाहनम्।
निजाशासंस्थितं वन्दे शक्तिहस्तं महाबलम्॥ ७६॥

दक्षिणाशापतिं कृष्णं यमं महिषवाहनम्।
दण्डिनं भीषणं वन्दे दंष्ट्रिणं घोरलोचनम्॥ ७७॥

प्रेतारूढं करालास्यं खड्गपाणिं निशाचरम्।
निर्ऋतिं च निजाशास्थं धूम्रमुग्रदृशं भजे॥ ७८॥

पश्चिमाशापतिं पाशधरं मकरवाहनम्।
नमामि यादसां नाथं वरुणं श्वेतविग्रहम्॥ ७९॥

पीनाङ्गं हरिणासीनं वायुमङ्कुशधारिणम्।
सदागतिं निजाशास्थं श्यामाङ्गं कुञ्चितभ्रुवम्॥ ८०॥

कुबेरं च गदाहस्तं गौराङ्गं निधिसंस्थितम्।
ह्रस्वपादकरं स्त्रीभिर्वृतमुत्तरदिक्पतिम्॥ ८१॥

श्वेतं वृषस्थमीशानं त्र्यक्षं व्याघ्राजिनाम्बरम्।
शूलिनं जटिनं चन्द्रधरमीडे स्वदिक्स्थितम्॥ ८२॥

तत्रैवोर्ध्वदिशानाथं प्रोक्ताकारं चतुर्मुखम्।
कमण्डल्वक्षमालाङ्कं कुशदण्डधरं भजे॥ ८३॥

शङ्खचक्रगदापद्महस्तं गरुडवाहनम्।
श्याममेकाननं विष्णुं वनमालाविभूषितम्॥ ८४॥

अधोदिगधिपं कान्तं पीतवस्त्रं श्रियान्वितम्।
चतुर्हस्तं त्रिवक्त्रं वा भोगिशय्यागतं भजे॥ ८५॥

[पञ्चममावरणम् (लोकपालास्त्राणि)]

वज्रं तु पुरुषं स्थूलं दृढं कर्कशविग्रहम्।
बलिनं वज्रमूर्धानं दीप्तं प्राक् पञ्चमावृतौ॥ ८६॥

शक्तिं च योषिदाकारामाग्नेय्यां दिशि लोहिताम्।
बिभ्राणां शिरसा शक्तिं त्रिकोणस्थामुपाश्रये॥ ८७॥

दण्डं च दक्षिणे भागे कृष्णं पुरुषविग्रहम्।
दण्डाकारशिरोयुक्तं वन्दे लोहितलोचनम्॥ ८८॥

नैर्ऋत्यां पुरुषाकारं खड्गं श्यामप्रभान्वितम्।
खड्गालङ्कृतमूर्धानं क्रुद्धं क्रूरदृशं नुमः॥ ८९॥

नाभ्यधो भुजगाकारं तदूर्ध्वं पुरुषाकृतिम्।

पाशं सप्तफणोपेतमूर्धानं पश्चिमे भजे॥ ९०॥

प्रपद्ये वायुदिग्भागे ध्वजं मूर्ध्नि ध्वजान्वितम्।
पीतं च पुरुषाकारं व्यावृतास्यं महाभुजम्॥ ९१॥

कन्यारूपां गदां पीतामापीनजघनस्थलाम्।
गदाकारशिरोयुक्तामुत्तरस्यां नतोऽस्म्यहम्॥ ९२॥

त्रिशूलं पुरुषाकारं दिव्यं श्यामकलेवरम्।
त्रिशूलशिरसं शश्वन्नमामीशानदिग्गतम्॥ ९३॥

शङ्खाभं पद्मकोशाङ्कमूर्धानं पुरुषाकृतिम्।
नौमि दिव्यं विरिञ्चास्त्रं शुक्लाभं शुभलोचनम्॥ ९४॥

चक्रं शतारचक्राङ्कमूर्धानं पुरुषाकृतिम्।
श्यामदेहं मुकुन्दास्त्रं सेवे निर्ऋतिकोणगम्॥ ९५॥

[शिवाग्निः]

सप्तजिह्वान्वितं रक्तं पञ्चास्यं प्रज्वलच्छिखम्।
वागीशीगर्भसम्भूतं शिवाग्निं शिवदं भजे॥ ९६॥

तत्रस्थं तु सदेशानमाश्रयानुगुणान्वितम्।
सर्वाभीष्टप्रदं वन्दे हविरादानतत्परम्॥ ९७॥

[शिवबलिभुजः]

रुद्रान् मातॄस्तदनु सगणान् गुह्यकान् सग्रहांस्तान्
वन्दे दैत्यानथ निशिचरान्नागनक्षत्रराशीन्।
विश्वांश्चैताञ्शिवबलिभुजः क्षेत्रपालं च कृष्णं

केशैरूर्ध्वैः कपिलरुचिभिर्दंष्ट्रिणं शूलहस्तम्॥ ९८॥

[गुरुपूजा]

पाशान्विमोच्य कृपया निखिलाननादीन्
यो मां शरीरनिधने परमुक्तिभाजम्।
चक्रे समस्तशिवशास्त्रविबोधहेतुं
नित्यं तमेव गुरुनाथमहं प्रपद्ये॥ ९९॥

[विद्यापीठाश्रय ईश्वरः]

सर्वज्ञानप्रदं शम्भुं सर्वाज्ञानविघातकम्।
कायेन मनसा वाचा विद्यापीठाश्रयं भजे॥ १००॥

[चण्डेश्वरः]

कृष्णं सुदंष्ट्रचतुराननमिन्दुचूडं
शार्दूलचर्मवसनं जटिलं त्रिणेत्रम्।
टङ्कं च शूलमथ कुण्डिकयाक्षमालां
चण्डेश्वरं स्मर करैर्दधतं चतुर्भिः॥ १०१॥

[फलश्रुतिः]

पशुपतिपदपद्मद्वन्द्वमभ्यर्च्य भक्त्या
प्रतिदिनमुपचारैः स्तोत्रमेतत्पठन्तः।
अभिमतमिह सर्वं देहपाते च मोक्षं
परमगतिमविघ्नं देशिकाद्याः प्रयान्ति॥ १०२॥

श्रीपरमेश्वरापरनामधेयश्री-अघोरशिवाचार्यविरचितं
पञ्चावरणस्तोत्रं सम्पूर्णम्॥ शुभमस्तु॥

॥ शिवपूजास्तवः ॥

प्रातः शङ्करचिन्तनस्नपनसंसेकासुसंरोधनैः
सन्ध्यासंस्मृतिमार्जनाघशमनोपस्थानसन्तर्पणैः।
द्वारस्यार्चनयागधामगतविघ्नोद्वासनाद्यैः प्रभो-
र्यः श्रीमान्यजनं करोति भवतस्तस्यैव सिद्धिद्वयम्॥ १॥

एकैवार्थत ईशशक्तिरमिता यानेकरूपा शिवा
कालोपाधिवशाद्द्विजास्त्वनुदिनं ब्राह्मयादिरूपेण ताम्।
ध्यायन्त्यत्र तु निर्मलात्मशिवयोः सन्धिश्च शैवी पुरा
सन्ध्यातः शिव एव साधकवरैर्ध्येयः सदा निर्मलः॥ २॥

प्रातः स्मरामि हृदयाब्जखमध्यसंस्थं
चन्द्रार्कमार्गविरहोदितचित्स्वरूपम्।
ध्येयं सदा मुनिवरैरपवर्गसिद्ध्यै
विश्वात्मकं सदसदन्तमनन्तमीशम्॥ ३॥

मध्यन्दिने शतसहस्रनिशाकराभं
विश्वेश्वरं परमकारणमप्रमेयम्।
शम्भुं सदोदितममायवियत्स्वरूपं
